तङ्ग—१ प०, गतौ स्खलने कम्पने च (जाना, लड़खड़ाना, हिलाना), लट्—तङ्गति, लिट्—ततङ्ग, लुट्—तङ्गिता, लुङ्—अतङ्गीत् । क्त—तङ्गित ।

तञ्च्—१ प०, (जाना), लट्—तञ्चति, लिट्—ततञ्च, लुट्—तञ्चिता, लुङ्—अतञ्चीत् । क्त—तक्त, क्त्वा—तञ्चित्वा, तक्त्वा ।

तञ्च्—७ प०, सकोचने (संकुचित होना, सिकुड़ना), लट्—तनक्ति, लिट्—ततञ्च, लुट्—तक्ता, तञ्चिता, लृट्—तङ्क्ष्यति, तञ्चिष्यति, लुङ्—अतञ्चीत्, अताङ्क्षीत् । णिच्—तञ्चयति—ते । सन्—तितञ्चिषति, तितङ्क्षति ।

तञ्ज्—तञ्च् के तुल्य ।

तट्—१ प०, उच्छ्राये (उगना), लट्—तटति, लिट्—तताट, लुट्—तटिता, लुङ्—अतटीत्—अताटीत् ।

तड्—१० उ०, आघाते भाषाया च (पीटना), लट्—ताडयति—ते, लिट्—ताडयाचकार—चक्रे, लुट्—ताडयिता, लृट्—ताडयिष्यति—ते, लुङ्—अतीतडत्—त । कर्म०—लट्—ताडयते, क्त—ताडित ।

तण्ड्—१ आ०, ताडने (पीटना), लुट्—तण्डते, लिट्—ततण्डे, लुट्—तण्डिता, लुङ्—अतण्डिष्ट ।

तन्—८ उ०, विस्तारे (फैलाना, जाना), लट्—तनोति, तनुते, लिट्—ततान, तेने, लुट्—तनिता, लृट्—तनिष्यति, ते, लुङ्—अतनीत्, अतानीत्, अतनिष्ट, अतत, आ० लिङ्—तन्यात्—तनिषीष्ट । सन्—तितांसति—ते, तितसति—ते, तितनिषति—ते, कर्म०—लट्—तन्यते—तायते, लुङ्—अतानि, णिच्—लट्—तानयति—ते, लुङ्—अतीतनत—त, क्त—तत, क्त्वा—तनित्वा, तत्वा ।

तन्—१ प०, १० उ०, श्रद्धोपकरणयो. (विश्वास करना, साधन होना), लट्—तनति, तानयति—ते, लुङ्—अतनीत्, अतानीत्, अतीतनत्—त ।

तन्त्र्—१० आ०, कुटुम्बधारणे (पालन करना, स्वामी होना), लट्—तन्त्रयते, लिट्—तन्त्रयाचक्रे, लुङ्—अततन्त्रत । तितन्त्रयिषते, कर्म०—तन्त्र्यते ।

तप्—१ प०, सतापे, (तपाना, चमकना), लट्—तपति, लिट्—तताप, लुट्—तप्ता, लुङ्—अताप्सीत्, आ० लिङ्—तप्यात् । सन्—तितप्सति, कर्म०—लट्—तप्यते, लुङ्—अतप्त । णिच्—लट्—तापयति—ते, लुङ्—अतीतपत्—त, क्त—तप्त ।

तप्—४ आ०, ऐश्वर्ये (शासन करना, शक्तियुक्त होना), लट्—तप्यते, लिट्—तेपे, लुट्—तप्ता, लृट्—तप्स्यते, लृङ्—अतप्स्यत, लुङ्—अतप्त, आ० लिङ्—तप्सीष्ट, क्त—तप्त ।

तप्—१० उ०, (तपाना), लट्—तापयति—ते, लिट्—तापयाचकार—चक्रे, लुट्—तापयिता, लुङ्—अतीतपत्—त ।

तम्—४ प०, काङ्क्षायां खेदे च (चिन्तित होना, थका हुआ होना), लट्—ताम्यति, लिट्—तताम, लुट्—तमिता, लृट्—तमिष्यति, लृङ्—अतमिष्यत्, लुङ्—अतमत्, क्त—तान्त, क्त्वा—तमित्वा, तान्त्वा ।

तय्—१ आ०, (जाना), लट्–तयते, लिट्–तेये, लुट्–तयिता, लुङ्–अतयिष्ट ।

तर्क्—१० उ०, वितर्के (अनुमान करना, तर्क करना), लट्–तर्कयति–ते, लिट्–तर्कयाञ्चकार–चक्रे, लुट्–तर्कयिता, लृट्–तर्कयिष्यति–ते, लृङ्–अतर्कयिष्यत्–त, लुङ्–अततर्कत्–त, क्त–तर्कित, क्त्वा–तर्कयित्वा ।

तर्ज्—१ प०, भर्त्सने (डराना, धमकाना), लट्–तर्जति, लिट्–ततर्ज, लुट्–तर्जिता, लृट्–तर्जिष्यति, लृङ्–अतर्जिष्यत्, लुङ्–अतर्जीत् । सन्–तितर्जिषति, क्त–तर्जित ।

तर्ज्—१० आ०, भर्त्सने (आक्षेप लगाना), लट्—तर्जयते, लिट्–तर्जयाचक्रे, लुट्–तर्जयिता, लुङ्–अततर्जत, क्त–तर्जित ।

तर्द्—१ प०, हिंसायाम् (मारना, चोट पहुँचाना), लट्–तर्दति, लिट्–ततर्द, लुट्–तर्दिता, लुङ्–अतर्दीत् ।

तल्—१० उ०, प्रतिष्ठायाम् (स्थिर होना), लट्–तालयति–ते ।

तस्—४ प०, उपक्षये (क्षीण होना), लट्–तस्यति, लुङ्–अतसत् ।

तंस्—१ प०, १० उ०, अलकरणे (सजाना), लट्–तंसति और तसयति–ते, लिट्–ततंस, तंसयाचकार–चक्रे, लुट्–तसिता, तंसयिता, लुङ्–अतंसीत्, अततंसत्–त ।

तायृ—१ आ०, संतानपालनयोः (फैलाना, रक्षा करना), लट्–तायते, लिट्–तताये, लुट्–तायिता, लुङ्–अतायिष्ट, अतायि । णिच् लट्–ताययति–ते, लुङ्–अततायत्–त । सन्—तितायिषते ।

तिक्—१ आ०, (जाना), लट्–तेकते, लुट्–तेकिता, लुङ्–अतेकिष्ट ।

तिक्—५ प०, आस्कन्दने वधे च (आक्रमण करना), लट्–तिक्नोति, लिट्–तितेक, लुट्–तेकिता, लुङ्–अतेकीत् ।

तिग्—५ प० (आक्रमण करना), लट्–तिग्नोति, लिट्–तितेग, लुट्–तेगिता, लुङ्–अतेगीत् ।

तिघ्—५ प०, हिंसायाम् (हानि पहुँचाना), लट्–तिघ्नोति, लिट्–तितेघ, लुट्–तेघिता, लुङ्–अतेघीत् ।

तिज्—१ आ०, क्षमायाम् (सहन करना), लट्–तितिक्षते, लिट्–तितिक्षाचक्रे, लुट्–तितिक्षिता, लृट्–तितिक्षिष्यते, लुङ्–अतितिक्षिष्ट, आ० लिङ्–तितिक्षिषीष्ट । सन्–तितिक्षिषते, णिच्–तितिक्षयति–ते । (जब इसका अर्थ तीक्ष्ण करना होगा, निशाने), लट्–तेजते, लृट्–तेजिष्यते, लुङ्–अतेजिष्ट ।

तिज्—१० उ०, निशाने (तीक्ष्ण करना) लट्–तेजयति–ते, लिट्–तेजयाचकार–चक्रे, लुट्–तेजयिता, लुङ्–अतीतिजत्–त ।

तिप्—१ आ०, क्षरणे (सींचना, टपकाना), लट्–तेपते, लिट्–तितिपे, लुट्–तेप्ता, लृट्–तेप्स्यते, लृङ्–अतेप्स्यत, आ० लिङ्–तिप्सीष्ट, लुङ्–अतिप्त ।

तिम्—४ प०, आर्द्रीभावे (गीला होना), लट्–तिम्यति, लिट्–तितेम, लुट्–तेमिता, लुङ्–अतेमीत् । सन्–तितिमिषति, तितेमिषति, यङ्–तेतिम्यते ।

तिल्—१ प०, गतौ (जाना), लट्–तेलति, लिट्–तितेल, लुट्–तेलिता, लुङ्–अतेलीत् ।

तिल्—६ प० और १० उ० (चिकना होना), लट्–तिलति, तेलयति–ते, लिट्–तितेल, तेलयाञ्चकार–चक्रे, लुट्–तेलिता, तेलयिता, लुङ्–अतेलीत्, अतीतिलत्–त ।

तिल्ल्—१ प०, (जाना), लट्–तिल्लति, लुङ्–अतिल्लीत् ।

तीक्—१ आ०, (जाना), लट्–तीकते, लिट्–तितीके, लुट्–तीकिता, लुङ्–अतीकिष्ट ।

तीम्—४ प०, क्लेदने (गीला होना), लट्–तीम्यति, लुङ्–अतीमीत् ।

तीव्—१ प०, स्थौल्ये (मोटा होना), लट्–तीवति, लिट्–तितीव, लुट्–तीविता, लुङ्–अतीवीत् ।

तु—२ प०, गतिवृद्धिहिंसासु (जाना, मारना, उगना), लट्–तौति, तवीति, लिट्–तुताव, लुट्–तोता, लृट्–तोष्यति, लङ्–अतावीत्, लुङ्–अतावीत् ।

तुज्—१ प०, हिंसायाम् (मारना), लट्–तोजति, लिट्–तुतोज, लुट्–तोजिता, लुङ्–अतोजीत् ।

तुञ्ज्—१ प०, प्रापणे हिंसायां बले च (पहुँचना, मारना, शक्तिशाली होना), लट्–तुञ्जति, लिट्–तुतुञ्ज, लुट्–तुञ्जिता, लुङ्–अतुञ्जीत् ।

• तुज, तुञ्ज्—१० उ०, हिंसाबलादाननिकेतनेषु (मारना, शक्तिशाली होना, जीना), लट्–तोजयति–ते, तुञ्जयति–ते, लिट्–तोजयाञ्चकार–चक्रे, तुञ्जयाञ्चकार–चक्रे, लुट्–तोजयिता, तुञ्जयिता, लुङ्–अतूतुजत्–त, अतुतुञ्जत्–त ।

तुट्—६ प०, कलहकर्मणि (कुटादि), (झगड़ा करना, काटना), लट्–तुटति, लिट्–तुतोट, लुट्–तुटिता, लुङ्–अतुटीत् ।

तुड्—१, ६ प० (कुटादि), ताडने (फाड़ना, मारना), लट्–तोडति, तुडति, लुट्–तोडिता, तुडिता, लुङ्–अतुडीत्, अतोडीत् ।

तुड्ड्—१ प०, अनादरे (अनादर करना), लट्–तुड्डति, लुङ्–अतुड्डीत् ।

तुण्—६ प०, कौटिल्ये (टेढ़ा करना), लट्–तुणति, लिट्–तुतोण, लुट्–तोणिता, लुङ्–अतोणीत् ।

तुत्थ्—१० उ०, आवरणे (ढकना), लट्–तुत्थयति–ते, लुङ्–अतुतुत्थत्–त ।

तुद्—६ उ०, व्यथने (दुःख देना, चोट मारना), लट्–तुदति–ते, लिट्–तुतोद–तुतुदे, लुट्–तोत्ता, लृट्–तोत्स्यति–ते, लङ्–अतोत्स्यत्–त लुङ्–अतौ-

त्सीन्, अतुत्त, आ० लिङ्–तुद्यात्–तोत्सीष्ट । सन्–तुतुत्सति–ते, कर्म० लट्–तुद्यते, लुङ्–अतोदि, णिच्–लट्–तोदयति–ते, लुङ्–अतूतुदत्–त, क्त–तुन्न, क्त्वा–तुत्त्वा ।

तुन्द्—१ प० (खोजना), लट्–तुन्दन्ति, लिट्–तुतुन्द, लुट्–तुन्दिता, लुङ्–अतुन्दीत् ।

तुप्—१ और ६ प०, हिंसायाम् (मारना), लट्–तोपति, तुपति, लिट्–तुतोप, लुट्–तोपिता, लुङ्–अतोपीत् ।

तुफ्—१, ६ प०, हिंसायाम् (मारना), लट्–तोफते ।

तुभ्—१ आ०, हिंसायाम् (मारना), लट्–तोभते, लुङ्–अतुभत, अतोभिष्ट ।

तुभ्—४, ९ प०, (मारना, चोट पहुँचाना) लट्–तुभ्यति, तुभ्नाति, लिट्–तुतोभ, लुट्–तोभिता, लुङ्—(४) अतुभत्, (९) अतोभीत् ।

तुम्प्, तुम्फ्—१, ६ (तुप् और तुफ् के तुल्य) लट्–तुम्पति, तुम्फति ।

तुम्ब्—१ प०, अर्दने (दुःख देना, कष्ट पहुँचाना), लट्–तुम्बति, लुङ्–अतुम्बीत् । १० उ० (अदर्शने च) भी है ।

तुर्—३ प०, त्वरणे (शीघ्रता करना), लट्–तुतोर्ति, लिट्–तुतोर, लुट्–तोरिता, लुङ्–अतोरीत् (वैदिक) ।

तुर्व्—१ प०, हिंसायाम् (मारना), लट्–तुर्वति, लिट्–तुतूर्व, लुट्–तूर्विता, लुङ्–अतूर्वीत् ।

तुल्—१० उ०, उन्माने (तोलना, परीक्षा करना), लट्–तोलयति–ते, लिट्–तोलयाञ्चकार–चक्रे, लुट्–तोलयिता, लृट्–तोलयिष्यति–ते, आ० लिङ्–तोल्यात्, तोलयिषीष्ट, लुङ्–अतूतुलत्–त । कर्म०–लट्–तोल्यते, लुङ्–अतोलीत्, क्त–तोलित ।

तुष्—४ प०, तुष्टौ (सन्तुष्ट होना), लट्–तुष्यति, लिट्–तुतोष, लुट्–तोष्टा, लृट्–तोक्ष्यति, लृङ्–अतोक्ष्यत्, आ०, लिङ्–तुष्यात्, लुङ्–अतुषत् । सन्–तुतुक्षति, कर्म० लट्–तुष्यते, लुङ्–अतोषि, क्त–तुष्ट, क्त्वा–तुष्ट्वा, तुम्–तोष्टुम् ।

तुस्—१ प० (शब्द करना), लट्–तोसति, लिट्–तुतोस, लुट्–तोसिता, लुङ्–अतोसीत् ।

तुह्—१ प०, अर्दने वधे च (दुःख देना, हिंसा करना), लट्–तोहति, लुङ्–अतुहत्–अतोहीत् । सन्–तुतु–तो–हिषति ।

तूण्—१० आ०, पूरणे (भरना), लट्–तूणयते, लुङ्–अतूतुणत ।

तूर्—४ आ०, गतित्वरणहिंसनयोः (शीघ्रता से जाना, हिंसा करना), लट्–तूर्यते, लिट्–तुतूरे, लुट्–तूरिता, लुङ्–अतूरिष्ट । सन्–तुतूरिषते ।

तूल्—१ प०, निष्कर्षे (तोल के द्वारा भार निश्चित करना), लट्–तूलति,
लृट्–तूलिष्यति, लुङ्–अतूलीत् ।
तृक्ष्—१ प० (जाना), लट्–तृक्षति, लिट्–ततृक्ष, लुट्–तृक्षिता, लुङ्–
अतृक्षीत्, आ०, लिङ्–तृक्ष्यात् ।
तृण्—८ उ०, अदने (खाना), लट्–तर्णोति, तर्णुते, तृणोति, तृणुते, लिट्
–ततर्ण, ततृण, लुट्–तर्णिता, लृट्–तर्णिष्यति–ते, लुङ्–अतर्णीत्, अतर्णिष्ट,
अतृत । सन्–तितर्णिषति–ते, क्त—तृत, क्त्वा–तृणित्वा, तृत्वा ।
तृद्—७ उ०, हिंसानादरयो (नष्ट करना, अनादर करना), लट्–तृणत्ति,
तृन्ते, लिट्–ततर्द, ततृदे, लुट्–तर्दिता, लृट्–तर्दिष्यति–ते, तर्त्स्यति–ते, लृङ्–
अतर्दिष्यत्–त, लुङ्–अतृदत्, अतर्दीत्–अतर्दिष्ट, आ० लिङ्–तृद्यात्, तर्दिषीष्ट,
तृत्सीष्ट । सन्–तितर्दिषति, तितृत्सति, क्त–तृण्ण, क्त्वा–तर्दित्वा, तृत्त्वा ।
तृप्—४ प०, तृप्तौ (तृप्त होना), लट्–तृप्यति, लिट्–ततर्प, लुट्–तर्पिता,
तर्प्ता, त्रप्ता, लृट्–तर्पिष्यति, तर्प्स्यति, त्रप्स्यति, लृङ्–अतर्पिष्यत्, अतर्प्स्यत्,
अत्रप्स्यत्, लुङ्–अतृपत्–अतर्पीत्–अत्राप्सीत्–अतार्प्सीत्, आ० लिङ्–तृप्यात् ।
सन्–तितर्पिषति, तितृप्सति, णिच्–तर्पयति–ते, लुङ्–अततर्पत्–त, अतीतृपत्
–त, क्त–तृप्त, तुम्–तर्पितुम्, तर्प्तुम्–त्रप्तुम् ।
तृप्—५ प०, प्रीणने (प्रसन्न होना, प्रसन्न करना), लट्–तृप्नोति, लिट्–
ततर्प, लुट्–तर्पिता, लुङ्–अतर्पीत्, आ० लिङ्–तृप्यात् । सन्–तितर्पिषति,
तितृप्सति, क्त–तर्पित, क्त्वा–तर्पित्वा ।
तृप्—६ प०, (प्रसन्न होना, प्रसन्न करना), लट्–तृपति, (शेष रूप पूर्व-
वत्)
तृप्—१ प०, १० उ०, तृप्तौ सदीपने च, (सन्तुष्ट होना, जलाना), लट्–
तर्पति, तर्पयति–ते, लिट्–ततर्प, तर्पयाचकार–चक्रे, लुट्–तर्पिता, तर्पयिता, लुङ्–
अतर्पीत्, अततर्पत्–त, अतीतृपत्–त । क्त–तृपित, तर्पित ।
तृफ्, तृम्फ्—६ प०, प्रीणने (प्रसन्न करना), लट्–तृफति, तृम्फति, लुङ्–
अतर्फीत्, अतृम्फीत् ।
तृम्प्—६ प०, प्रीणने (प्रसन्न करना), लट्–तृम्पति, लृट्–तृम्पिष्यति,
लुङ्–अतृम्पीत् ।
तृष्—४ प०, पिपासायाम् (प्यासा होना), लट्–तृष्यति, लिट्–ततर्ष,
लुट्—तर्षिता, लृट्–तर्षिष्यति, लृङ्–अतर्षिष्यत्, लुङ्–अतृषत्, आ० लिङ्–
तृष्यात् । णिच्–लट्–तर्षयति–ते, लुङ्–अतीतृषत्–त, अततर्षत्–त, सन्–तित-
र्षिषति, क्त–तृष्ट, क्त्वा–तृषित्वा, तर्षित्वा ।
तृह्—६ प०, हिंसायाम् (मारना), लट्–तृहति, लिट्–ततर्ह, लुट्–
तर्हिता, तर्ढा, लृट्–तर्हिष्यति, तर्क्ष्यति, लुङ्–अतर्हीत्, अतृक्षत् । सन्–तितर्हिषति,
तितृक्षति, णिच्–अगली धातु के तुल्य । क्त–तृढ, क्त्वा, तर्हित्वा, तृढ्वा ।

तृह्—७ प०, (हिंसा करना, चोट पहुँचाना), लट्–तृणेढि, लिट्–ततर्ह, लुट्–तर्हिता, लृट्–तर्हिष्यति, लङ्–अतर्हिष्यत्, लुङ्–अतर्हीत्, आ० लिङ्–तृह्यात् । सन्–तितृक्षति, णिच् लट्–तर्हयति–ते, लुङ्–अततर्हत्–त, अथवा अतीतृहत्–त, कर्म० लट्– तृह्यते, लुङ्–अतर्हि, क्त–तृहित, क्त्वा–तर्हित्वा, तुम्–तर्हितुम् ।

तृह्—६ प० (मारना), लट्–तृहति, लिट्–ततर्ह, लुट्–तर्हिता, तृढा, लृट्–तर्हिष्यति, तृक्ष्यति, लुङ्–अतर्हीत्, अताड्क्षीत्, आ० लिङ्–तृह्यात् । सन्–तितृक्षति, तितर्हिषति, तुम्–तर्हितुम्, तृण्ढुम् ।

तॄ—१ प०, प्लवनतरणयो (तैरना, पार करना), लट्–तरति, लिट्–ततार, लुट्–तरिता, तरीता, लृट्–तरिष्यति, तरीष्यति, लुङ्–अतारीत्, आ० लिङ्–तीर्यात् । सन्–तितीर्षति, क्त–तीर्ण, क्त्वा–तीर्त्वा । कर्म० लट्–तीर्यते, लिट्–तेरे, लुट्–तारिता, तरिता, तरीता, लुङ्–अतारि, आ० लिङ्–तारिषीष्ट, तरिषीष्ट, तीर्षीष्ट, णिच्–लट्–तारयति–ते, लुङ्–अतीतरत्–त ।

तेज्—१ प०, निशाने पालने च (तीक्ष्ण करना, रक्षा करना), लट्–तेजति, लिट्–तितेज, लुट्–तेजिता, लुङ्–अतेजीत् ।

तेप्— १ आ०, क्षरणे कम्पे च्युतौ च (गिरना, हिलाना), लट्–तेपते, लिट्–तितेपे, लुट्–तेपिता, लुङ्–अतेपिष्ट ।

तेव्—१ आ०, देवने (खेलना), लट्–तेवते, लुङ्–अतेविष्ट ।

त्यज्—१ प०, हानौ (छोडना), लट्–त्यजति, लिट्–तत्याज, लुट्–त्यक्ता, लृट्–त्यक्ष्यति, लङ्–अत्यक्ष्यत्, लुङ्–अत्याक्षीत्, आ० लिङ्–त्यज्यात् । णिच् लट्–त्याजयति–ते, लुङ्–अतित्यजत्–त, सन्–तित्यक्षति, कर्म० लट्–त्यज्यते, लुङ्–अत्याजि, क्त–त्यक्त, क्त्वा–त्यक्त्वा, तुम्–त्यक्तुम् ।

त्रङ्क्—१ आ०, (जाना), लट्–त्रङ्कते, लिट्–तत्रङ्के, लुट्–त्रङ्किता, लुङ्–अत्रङ्किष्ट ।

त्रख्—त्रङ्ख्—१ प०, (जाना), लट्–त्रखति, त्रङ्खति, लिट्–तत्राख, तत्रङ्ख, लुट्–त्रखिता, त्रङ्खिता, लुङ्–अत्रखीत्, अत्राखीत्, अत्रङ्खीत् ।

त्रङ्ग्—१ प०, (हिलना), लट्–त्रङ्गति, लिट्–तत्रङ्ग, लुट्–त्रङ्गिता, लुङ्–अत्रङ्गीत् ।

त्रप्—१ आ०, लज्जायाम् (लज्जित होना), लट्–त्रपते, लिट्–त्रेपे, लुट्–त्रपिता, त्रप्ता, लृट्–त्रपिष्यते, त्रप्स्यते, लङ्–अत्रपिष्यत्, अत्रप्स्यत, लुङ्–अत्रपिष्ट, अत्रप्त, आ० लिङ्–त्रपिषीष्ट, त्रप्सीष्ट, णिच् लट्–त्रपयति–ते, लुङ्–अतित्रपत्–त । सन्–तित्रपिषते, क्त–त्रप्त, क्त्वा–त्रपित्वा, त्रप्त्वा, तुम्–त्रपितुम्, त्रप्तुम् ।

त्रस्—१ और ४ प०, उद्वेगे (डरना, काँपना) लट्–त्रसति, त्रस्यति, लिट्–तत्रास, लुट्–त्रसिता, लृट्–त्रसिष्यति, लङ्–अत्रसिष्यत्, लुङ्–अत्रासीत्,

अत्रसीत्, आ० लिङ-त्रस्यात्, कर्म० लट्-त्रस्यते, लुङ-अत्रासि । णिच्-लट्-
त्रासयति-ते, लुङ-अतित्रसत्-त । सन्-तित्रसिषति, क्त-त्रस्त, क्त्वा-त्रसित्वा,
तुम्-त्रसितुम् ।
त्रस्—१० उ०, ग्रहणे धारणे वारणे च (लेना, पकड़ना, हटाना), लट्-
त्रासयति-ते, लिट्-त्रासयाचकार-चक्रे, लुट्-त्रासयिता, लुङ-अतित्रसत्-त ।
त्रंस्—१ प० और १० उ०, भाषायाम् (बोलना), लट्-त्रंसति, त्रंसयति-
ते, लुङ-अत्रंसीत्, अतत्रंसत्-त ।
त्रिह्व—१ प०, (जाना), लट्-त्रिह्वति, लिट्-तित्रिह्व, लुट्-त्रिह्विता,
लुङ-अत्रिह्वीत् ।
त्रुट्—६ प०, छेदने (कुटादि) (फाड़ना, तोड़ना), लट्-त्रुट्यति, लिट्-
तुत्रोट, लुट्-त्रुटिता, लृट्-त्रुटिष्यति, लुङ-अत्रुटीत्, आ० लिङ-त्रुट्यात् । णिच्
लट्-त्रोटयति-ते, लुङ-अतुत्रुटत्-त । सन्-तुत्रुटिषति, कर्म० लट्-त्रुट्यते, लुङ-
अत्रोटि, क्त-त्रुटित, क्त्वा-त्रुटित्वा ।
त्रुट्—१० आ०, छेदने (फाड़ना), लट्-त्रोटयते, लिट्-त्रोटयाञ्चक्रे,
लुट्-त्रोटयिता, लुङ-अतुत्रुटत, आ० लिङ-त्रोटयिषीष्ट ।
त्रुप्, त्रुम्प्—१ प०, हिंसायाम् (मारना), लट्-त्रोपति, त्रुम्पति, लुङ-
अत्रोपीत्, अत्रुम्पीत् ।
त्रुफ्, त्रुम्फ्—पूर्ववत् ।
त्रै—१ आ०, पालने (रक्षा करना), लट्-त्रायते, लिट्-तत्रे, लुट्-
त्राता, लृट्-त्रास्यते, लृङ-अत्रास्यत, लुङ-अत्रास्त, आ० लिङ-त्रासीष्ट,
णिच् लट्-त्रापयति-ते, लुङ-अतित्रपत्-त सन्-तित्रासते, कर्म-लट्-त्रायते,
लुङ-अत्रायि, क्त-त्रात (त्राण), तुम्-त्रातुम् ।
त्रौक्—१ आ०, (जाना), लट्-त्रौकते, लिट्-तुत्रौके, लुट्-त्रौकिता,
लृट्-त्रौकिष्यते, लुङ-अत्रौकिष्ट ।
त्वक्ष्—१ प०, तनूकरणे (छीलना), लट्-त्वक्षति, लिट्-तत्वक्ष, लु़ट्-
त्वक्षिता, त्वष्टा, लृट्-त्वक्षिष्यति, त्वक्ष्यति, लुङ-अत्वक्षीत्, अत्वाक्षीत्
आ० लिङ-त्वक्ष्यात् । सन्-तित्वक्षिषति, तित्वक्षति, क्त-त्वष्ट, क्त्वा-त्वक्षित्वा
त्वष्ट्वा ।
त्वङ्ग्—१ प०, गतौ कम्पने च (जाना, हिलाना), लट्-त्वङ्गति, लिट्-
तत्वङ्ग, लुट्-त्वङ्गिता, लुङ-अत्वङ्गीत् ।
त्वच्—६ प०, संवरणे (ढकना), लट्-त्वचति, लिट्-तत्वाच, लुट्-
त्वचिता, लुङ-अत्वचीत्, अत्वाचीत् ।
त्वञ्च्—१ प० (जाना, हिलना), लट्-त्वञ्चति, लिट्-तत्वञ्च, लुट्-
त्वञ्चिता, लुङ-अत्वञ्चीत्, आ० लिङ-त्वच्यात् । सन्-तित्वञ्चिषति, कर्म०
-त्वच्यते ।

त्वर्—१ आ०, सम्भ्रमे (शीघ्रता करना, शीघ्रता से जाना), लट्–त्वरते, लिट्–तत्वरे, लुट्–त्वरिता, लुङ–अत्वरिष्ट, आ० लिङ–त्वरिषीष्ट । सन्–तित्वरिषते, क्त–त्वरित या तूर्ण । णिच्, लट्–त्वरयति–ते, लुङ–अतत्वरत्–त ।

त्विष्—१ उ०, दीप्तौ (चमकना), लट्–त्वेषति–ते, लिट्–तित्वेष, तित्विषे, लुट्–त्वेष्टा, लृट्–त्वेक्ष्यति–ते, लृङ–अत्वेक्ष्यत्–त, लुङ–अत्विक्षत्–त । सन्–तित्विक्षति–ते ।

त्सर्—१ प०, छद्मगतौ (छल पूर्वक जाना), लट्–त्सरति, लिट्–तत्सार, लुट्–त्सरिता, लुङ–अत्सारीत् ।

थ

थुड्—६ प०, संवरणे (कुटादि) (ढकना, छिपाना), लट्–थुडति, लिट्–तुथोड, लुट्–थुडिता, लुङ–अथुडीत् ।

थुर्व्—१ प०, हिंसायाम् (हानि पहुँचाना), लट्–थूर्वति, लिट्–तुथूर्व, लुट्–थूर्विता, लुङ–अथूर्वीत् ।

द

दंश्—१ प०, दशने भाषायां च (डक मारना, कहना) लट्–दशति, लिट्–ददंश, लुट्–दंष्टा, लृट्–दङ्क्ष्यति, लुङ–अदाङ्क्षीत् (द्विव० अदाष्टाम्), आ० लिङ–दश्यात् । सन्–दिदङ्क्षति, कर्म०–दश्यते, लुङ–अदंशि, क्त–दष्ट, क्त्वा–दंष्ट्वा, तुम्–दंष्टुम् ।

दंश्—१० आ०, दशने (डक मारना), लट्–दंशयते, लुङ–अददंशत । सन्–दिदंशयिषते, कर्म० लट्–दंश्यते, क्त–दंशित ।

दंश्—१० उ०, भाषायाम् (बोलना), लट्–दंशयति–ते, लुङ–अददंशत्–त ।

दक्ष्—१ आ०, वृद्धौ शीघ्रार्थे (गतिहिंसनयोश्च), (बढना, शीघ्रता से जाना, जाना, मारना), लट्–दक्षते, लिट्–ददक्षे, लृट्–दक्षिष्यते, लुङ–अदक्षिष्ट ।

दघ्—५ प०, घातने पालने च (हिंसा करना, रक्षा करना), लट्–दघ्नोति, लिट्–ददाघ, लुट्–दघिता, लुङ–अदघीत्, अदाघीत्, (वैदिक) ।

दण्ड्—१० उ०, दण्डनिपातने दमने च (दण्ड देना), लट्–दण्डयति–ते, लिट्–दण्डयाचकार–चक्रे, लुट्–दण्डयिता, लृट्–दण्डयिष्यति–ते, लुङ–अददण्डत्–त । सन्–दण्डयिषीष्ट, क्त–दण्डित ।

दद्—१ आ०, दाने (देना), लट्–ददते, लिट्–दददे, लुट्–ददिता, लृट्–ददिष्यते, लुङ–अददिष्ट, आ० लिङ–ददिषीष्ट । सन्–दिददिषते, णिच्–लट्–दादयति–ते, लुङ–अदीददत्–त ।

दध्—१ आ०, धारणे (रखना, लेना), लट्–दधते, लिट्–देधे, लुट्–दधिता, लुङ–अदधिष्ट, आ० लिङ–दधिषीष्ट । सन्–दिदधिषते, णिच्–लट्–दाधयति–ते, कर्म० लट्–दध्यते ।

दम्भ्—५ प०, दम्भने (चोट पहुँचाना, धोखा देना), लट्–दम्नोति, लिट्–ददम्भ, लुट्–दम्भिता, लृट्–दम्भिष्यति, लुङ–अदम्भीत् । सन्–धिप्सति, धीप्सति, दिदम्भिषति, कर्म० लट्–दभ्यते, लुङ–अदम्भि, क्त–दब्ध, क्त्वा–दम्भित्वा–दब्ध्वा ।

दम्भ्—१० उ०, प्रेरणे (भेजना), लट्–दम्भयति–ते, लिट्–दम्भयाञ्चकार–चक्रे, लुङ–अददम्भत्–त, आ० लिङ–दम्भ्यात्, दम्भयिषीष्ट । कर्म०–दम्भ्यते ।

दम्—४ प०, उपशमे (शान्त होना), लट्–दाम्यति, लिट्–ददाम, लुट्–दमिता, लृट्–दमिष्यति, लृङ–अदमिष्यत्, लुङ–अदमत् । णिच्–दमयते, लुङ–अदीदमत, कर्म०–दम्यते, लुङ–अदमि, अदामि, क्त–दमित, दान्त, क्त्वा–दमित्वा, दान्त्वा ।

दय्—१ आ०, दानगतिरक्षणहिंसादानेषु (देना, दया करना, रक्षा करना, चोट पहुँचाना, लेना), लट्–दयते, लिट्–दयाचक्रे, लुट्–दयिता, लृट्–दयिष्यते, लुङ–अदयिष्ट, आ० लिङ–दयिषीष्ट । सन्–दिदयिषते, क्त–दयित ।

दरिद्रा—२ प०, दुर्गतौ, (दरिद्र होना), लट्–दरिद्राति, लिट्–दरिद्राञ्चकार, ददरिद्रौ, लुट्–दरिद्रिता, लुङ–अदरिद्रीत्, अदरिद्रासीत्, आ० लिङ–दरिद्र्यात् । सन्–दिदरिद्रासति, दिदरिद्रिषति, क्त–दरिद्रित ।

दल्—१ प०, विशरणे (फटना, फैलना), लट्–दलति, लिट्–ददाल, लुट्–दलिता, लुङ–अदालीत् । क्त–दलित, णिच्–दलयति, दालयति, सन्–दिदलिषति ।

दल्—१० उ०, विदारणे (फाड़ना), लट्–दालयति, लुङ–अदीदलत्–त ।

दस्—४ प०, उपक्षये (नष्ट होना), लट्–दस्यति, लिट्–ददास, लुट्–दसिता, लुङ–अदसत् ।

दंस्—१ प०, १० आ०, दर्शनदशनयो (देखना, डक मारना), लट्–दसति, दसयते, लिट्–ददस, दसयाञ्चक्रे, लुङ–अदसीत्, अददसत ।

दंस्—१ प०, १० उ०, भाषायाम् (बोलना), लट्–दसति, दसयति–ते ।

दह्—१ प०, भस्मीकरणे (जलाना, दुःख देना), लट्–दहति, लिट्–ददाह, लुट्–दग्धा, लृट्–धक्ष्यति, लुङ–अधाक्षीत् (द्वि० अदाग्धाम्), आ० लिङ–दह्यात् । सन्–दिधक्षति, णिच् लट्–दाहयति–ते, लुङ–अदीदहत्–त, कर्म० लट्–दह्यते, लुङ–अदाहि, क्त–दग्ध, क्त्वा–दग्ध्वा, तुम्–दग्धुम् ।

दा—१ प०, दाने (देना) लट्–यच्छति, लिट्–ददौ, लुट्–दाता, लृट्–दास्यति, लृङ–अदास्यत्, लुङ–अदात्, आ० लिङ–देयात् । सन्–दित्सति, कर्म० लट्–दीयते, लुङ–अदायि, णिच्–लट्–दापयति–ते, लुङ–अदीदपत्–त, क्त–दत्त, क्त्वा–दत्त्वा, तुम्–दातुम् ।

दा—२ प०, लवने (काटना), लट्–दाति, (लिट् और लुट् में पूर्ववत्), लुङ्–अदासीत्, आ० लिङ्–दायात् । सन्–दिदासति, कर्म–दायते, क्त–दात ।

दा—३ उ०, दाने (देना, रखना), लट्–ददाति, दत्ते, लिट्–ददौ, ददे, लुट्–दाता, लृट्–दास्यति–ते, लृङ्–अदास्यत्–त, लुङ्–अदात्, अदित, आ०, लिङ्–देयात्, दासीष्ट । सन्–दित्सति–ते, क्त–दत्त, क्त्वा–दत्त्वा, तुम्–दातुम्, कर्म० लट्–दीयते, लुङ्–अदायि ।

दान्—१ उ०, खण्डने आर्जवे च (काटना, सीधा करना), लट्–दीदांसति–ते, लिट्–दीदांसाञ्चकार–चक्रे, लुङ्–अदीदांसीत्, अदीदांसिष्ट । सन्–दीदांसिषति–ते ।

दान्—१० उ०, छेदने (काटना), लट्–दानयति–ते, लुङ्–अदीदनत्–त ।

दाय्—१ आ०, दाने (देना), लट्—दायते, लिट्–ददाये, लृट्–दायिष्यते, लुङ्–अदायिष्ट ।

दास्—१ उ०, दाने (देना), लट्–दासति–ते, लिट्–ददास्, ददासे, लुङ्–अदासीत्, अदासिष्ट ।

दास्—५ प०, हिंसायाम् (हिंसा करना, चोट पहुँचाना), लट्–दास्नोति (वैदिक) ।

दी—४ आ०, क्षये (नष्ट होना), लट्–दीयते, लिट्–दिदीये, लुट्–दाता, लृट्–दास्यते, लङ्–अदास्यत, लुङ्–अदास्त, आ० लिङ्–दासीष्ट । सन्–दिदीषते, क्त–दीन ।

दीक्ष्—१ आ०, मौण्ड्येज्योपनयननियमव्रतादेशेषु (यज्ञोपवीत धारण करना, किसी कार्य के लिए जीवन समर्पण करना, यज्ञ करना), लट्–दीक्षते, लिट्–दिदीक्षे, लुट्–दीक्षिता, लुङ्–अदीक्षिष्ट । कर्म० लट्–दीक्ष्यते, लुङ्–अदीक्षि, णिच्–लट्–दीक्षयति-ते, लुङ्–अदिदीक्षत्–त । सन्–दिदीक्षते, क्त–दीक्षित, क्त्वा–दीक्षित्वा ।

दीधी—२ आ०, दीप्तिदेवनयो (चमकना, प्रकट होना), लट्–दीधीते, लिट्–दीध्याञ्चक्रे, लुट्–दीधिता, लृट्–दीधिष्यते, लुङ्–अदीधिष्ट (वैदिक) ।

दीप्—४ आ०, दीप्तौ (चमकना, जलाना), लट्–दीप्यते, लिट्–दिदीपे, लुट्–दीपिता, लुङ्–अदीपिष्ट, अदीपि, आ० लिङ्–दीपिषीष्ट । सन्–दिदीपिषते, णिच् लट्–दीपयति-ते, लुङ्–अदीदिपत्–त, अदिदीपत्–त, कर्म० लट्–दीप्यते, लुङ्–अदीपि, क्त–दीप्त ।

दु—१ प०, (जाना), लट्–दवति, क्त–दून । शेष रूपों के लिए नीचे की धातु देखें ।

दु—५ प०, उपतापे (जलाना, दुःखित करना, कष्ट देना), लट्–दुनोति, लिट्–दुदाव, लुट्–दोता, लृट्–दोष्यति, लङ्–अदोष्यत्, लुङ्–अदौषीत्, आ० लिङ्–दूयात् । सन्–दुदूषति, कर्म०–लट्–दूयते, लुङ्–अदावि, क्त–दूत ।

दुःख—१० उ०, दुःखक्रियाम् (दुःख देना), लट्–दुःखयति, लुङ्–अदुदुःखत्–त ।

दुर्व्—१ प०, हिंसायाम् (मारना), लट्–दूर्वति, लिट्–दुदूर्व, लृट्–दूर्विष्यति, लुङ्–अदूर्वीत् ।

दुल्—१० उ०, उत्क्षेपे (इधर-उधर डुलाना), लट्–दोलयति-ते, लिट्–दोलयाञ्चकार-चक्रे, लुट्–दोलयिता, लुङ्–अदूदुलत्–त । सन्–दुदोलयिषति –ते ।

दुष्—४ प०, वैक्लव्ये (दुष्ट होना, अपवित्र होना), लट्–दुष्यति, लिट्–दुदोष, लुट्–दोष्टा, लङ्–अदोक्ष्यत्, लृट्–दोक्ष्यति, लुङ्–अदुषत्, आ० लिङ्–दुष्यात् । णिच् लट्–दूषयति-ते, दोषयति-ते भी होता है (दूषित करना), लुङ्–अदूदुषत्–त, सन्–दुदुक्षति, कर्म० लट्–दुष्यते, लुङ्–अदोषि, क्त–दुष्ट ।

दुह्—१ प०, अर्दने (दुःख देना, चोट पहुँचाना), लट्–दोहति, लिट्–दुदोह, लृट्–दोहिष्यति, लुङ्–अदुहत्, अदोहीत् । क्त–दुहित ।

दुह्—२ उ०, प्रपूरणे (दुहना, लाभ उठाना), लट्–दोग्धि, दुग्धे, लिट्–दुदोह, दुदुहे, लुट्–दोग्धा, लृट्–धोक्ष्यति-ते, लुङ्–अधुक्षत्, अधुक्षत, अदुग्ध, आ०

लिङ्—दुह्यात्, धुक्षीष्ट। सन्—दुधुक्षति—ते, कर्म० लट्—दुह्यते (दुग्ध भी होता है, देखो सूत्र ३, १, ८९)। लुङ्—अदोहि, (अदुग्ध, अधुक्षत), णिच् लट्—दोहयति—ते, लुङ्—अदूदुहत्—त, क्त—दुग्ध, क्त्वा—दुग्ध्वा, तुम्—दोग्धुम्।

दू—४ आ०, परितापे (दुखित होना, कष्ट उठाना), लट्—दूयते, लिट्—दुदुवे, लुट्—दविता, लृट्—दविष्यते, लृङ्—अदविष्यत, लुङ्—अदविष्ट, आ० लिङ्—दविषीष्ट। सन्—दुदूषते, णिच्—लट्—दावयति—ते, लुङ्—अदूदवत्—त, कर्म० लट्—दूयते, लुङ्—अदावि, क्त—दून।

दृ—६ आ०, आदरे (पूजा करना), (आ+दृ) (आदर करना), लट्—द्रियते, लिट्—दद्रे, लुट्—दर्ता, लुङ्—अदृत, आ० लिङ्—दृषीष्ट। सन्—दिदरिषते, कर्म० लट्—द्रियते, लुङ्—अदारि, णिच्—लट्—दारयति—ते, लुङ्—अदीदरत्—त, क्त—दृत, क्त्वा—दृत्वा, तुम्—दर्तुम्।

दृप्—४ प०, हर्षमोहनयोः (प्रसन्न होना, गर्वयुक्त होना), लट्—दृप्यति, लिट्—ददर्प, लुट्—दर्पिता, दर्प्ता, द्रप्ता, लृट्—दर्पिष्यति, दर्प्स्यति, द्रप्स्यति, लृङ्—अदर्पिष्यत्, अदर्प्स्यत्, अद्रप्स्यत्, लुङ्—अदृपत्, अदर्पीत्, अदार्प्सीत्, अद्राप्सीत्, आ० लिङ्—दृप्यात्। सन्—दिदर्पिषति दिदृप्सति, णिच् लट्—दर्पयति—ते, लुङ्—अदीदृपत्—त, अददर्पत्—त, क्त—दृप्त, क्त्वा—दृप्त्वा, दर्पित्वा, तुम्—दर्पितुम्, दर्प्तुम्, द्रप्तुम्।

दृप्—१ प०, १० उ०, सदीपने (क्रुद्ध करना, जलाना), लट्—दर्पति, दर्पयति—ते, लुट्—दर्पिता, दर्पयिता, लुङ्—अदर्पीत्, अदीदर्पत्—त, अददर्पत्—त, आ० लिङ्—दृप्यात्, दर्प्यात्, दर्पयिषीष्ट। सन्—दिदर्पिषति, दिदर्पयिषति—ते, कर्म० लट्—दृप्यते, दर्प्यते, लुङ्—अदर्पि, क्त—दृपित, दर्पित।

दृभ्—६ प०, ग्रन्थे (एकत्र करना, धागे मे बांधना), लट्—दृभति, लृट्—दर्भिष्यति, लुङ्—अदर्भीत्। णिच्-लट्—दर्भयति—ते, लुङ्—अदीदृभत्—त, अददर्भत्—त, सन्—दिदर्भिषति, क्त—दृब्ध, क्त्वा—दर्भित्वा।

दृभ्—१ प०, १० उ०, भये सदर्भे च (डरना, धागे मे इकट्ठा करना), लट्—दर्भति, दर्भयति—ते।

दृश्—१ प०, प्रेक्षणे (देखना, जानना), लट्—पश्यति, लिट्—ददर्श, लुट्—द्रष्टा, लृट्—द्रक्ष्यति, लृङ्—अद्रक्ष्यत्, लुङ्—अदर्शत्, अद्राक्षीत्, आ० लिङ्—दृश्यात्। सन्—दिदृक्षते, णिच् लट्—दर्शयति—ते, लुङ्—अदीदृशत्—त, अददर्शत्—त, यङ्—दरीदृश्यते, दर्दर्शीति, दर्दर्ष्टि, कर्म० लट्—दृश्यते, लुङ्—अदर्शि, क्त—दृष्ट, क्त्वा—दृष्ट्वा, तुम्—द्रष्टुम्।

दृह—दृंह-१ प०, वृद्धौ (बढ़ना, दृढ़ होना), लट्—दर्हति या दृंहति, लिट्—ददर्ह या ददृंह, लुट्—दर्हिता या दृंहिता, लुङ्—अदर्हीत् या अदृंहीत् क्त—दृढ, (पुष्ट) या दृंहित, दृंहित।

•दृ—१ प०, भये (डरना), लट्–दरति, लिट्–ददार, लुट्–दरिता–दरीता, लुङ्–अदारीत् ।

दृ—९ प०, विदारणे (फाडना), लट्–दृणाति, लिट्–ददार, लुट्–दरिता, दरीता, लृट्–दरिष्यति, दरीष्यति, लृङ्–अदरिष्यत्, अदरीष्यत्, लुङ्–अदारीत्, आ० लिङ्–दीर्यात् । सन्–ददरिषति, दिदरीषति, दिदीर्षति, णिच्–दारयति–ते, (दरयति–ते, डरने अर्थ में), कर्म० लट्–दीर्यते, लुङ्–अदारि, क्त–दीर्ण, क्त्वा–दीर्त्वा, ल्यप् विदीर्य, तुम्–दरितुम्, दरीतुम् ।

दे—१ आ०, पालने (पालन करना), लट्–दयते, लिट्–दिग्ये, लुट्–दाता, लुङ्–अदित, आ० लिङ्–दासीष्ट । सन्–दित्सते, कर्म० लट्–दीयते, णिच् लट्–दापयति–ते, लुङ्–अदीदपत्–त, क्त–दात ।

देव्—१ आ०, देवने (क्रीडा करना, रोना), लट्–देवते, लिट्–दिदेवे, लुट्–देविता, लृट्–देविष्यते, लृङ्–अदेविष्यत, लुङ्–अदेविष्ट । सन्–दिदेविषते, कर्म० लट्–देव्यते ।

दै—१ प०, शोधने (शुद्ध करना, शुद्ध होना), लट्–दायति, लिट्–ददौ, लुट्–दाता, लृट्–दास्यति, लृङ्–अदास्यत्, लुङ्–अदासीत्, आ० लिङ्–दायात् । सन्–दिदासति, कर्म० लट्–दायते, णिच्–लट्–दापयति–ते, क्त–दित, क्त्वा–दित्वा, ल्यप्–अवदाय ।

दो—४ प०, अवखण्डने (काटना, तोडना), लट्–द्यति, लिट्–ददौ, लुङ्–अदात्, आ० लिङ्–देयात् । सन्–दित्सति, णिच्–लट्–दापयति–ते, क्त–दित, क्त्वा, दित्वा, ल्यप्–अवदाय ।

द्यु—२ प०, अभिगमने (आक्रमण करना, आगे बढना), लट्–द्यौति, लिट्–दुद्याव, लुट्–द्योता, लृट्–द्योष्यति, लृङ्–अद्योष्यत्, लुङ्–अद्यौषीत् । सन्–दुद्यूषति, कर्म० लट्–द्यूयते, लुङ्–अद्यावि, णिच्–लट्–द्यावयति–ते, लुङ्–अदुद्यवत्–त, क्त–द्युत ।

द्युत्—१ आ०, दीप्तौ (चमकना), लट्–द्योतते, लिट्–दिद्युते, लुट्–द्योतिता, लृट्–द्योतिष्यते, लृङ्–अद्योतिष्यत, लुङ्–अद्योतिष्ट, अद्युतत्, आ० लिङ्–द्योतिषीष्ट, सन्–दिद्युतिषते, दिद्योतिषते, णिच्–लट्–द्योतयति–ते, लुङ्–अदुद्युतत्–त, यङन्त–देद्युत्यते, देद्योति, क्त–द्युतित, द्योतित ।

द्यै—१ प०, न्यक्करणे (तिरस्कार करना), लट्–द्यायति, लुट्–द्याता, लुङ्–अद्यासीत्, आ० लिङ्–द्यायात्–द्येयात् ।

द्रम्—१ प०, गतौ (दौडना), लट्–द्रमति, लिट्–दद्राम, लुङ्–अद्रमीत् ।

द्रा—२ प०, कुत्सायां गतौ स्वप्ने च (दौडना, सोना), (प्राय नि+द्रा) लट्–द्राति, लिट्–दद्रौ, लुट्–द्राता, लृट्–द्रास्यति, लृङ्–अद्रास्यत्, लुङ्–अद्रासीत्, आ० लिङ्–द्रायात्, द्रेयात् । सन्–दिद्रासति, क्त–द्राण ।

द्राघ्—१ आ०, सामर्थ्ये आयामे च (समर्थ होना, लम्बा करना), लट्–द्राघते, लिट्–दद्राघे, लुङ्–अद्राघिष्ट, आ० लिङ्–द्राघिषीष्ट ।

द्राक्ष्—१ प०, घोरवाशिते (भयकर शब्द करना), लट्–द्राक्षति, लिट्–दद्राक्ष, लुङ्–अद्राक्षीत् ।

द्रु—१ प०, गतौ (दौडना, पिघलना) लट्–द्रवति, लिट्–दुद्राव, लुट्–द्रोता, लृट्–द्रोष्यति, लृङ्–अद्रोष्यत्, लुङ्–अदुद्रवत् । सन्–दुद्रूषति, कर्म० लट्–द्रूयते, लुङ्–अद्रावि, णिच्–लट्–द्रावयति, लुङ्–अदिद्रवत् या अदुद्रवत्, यङन्त–दोद्रूयते, दोद्रवीति, दोद्रोति, क्त–द्रुत ।

द्रुण्—६ प०, गतिहिंसाकौटिल्येषु (मारना, जाना आदि), लट्–द्रुणति, लिट्–दुद्रोण, लृट्–द्रोणिष्यति, लुङ्–अद्रोणीत् ।

द्रुह्—४ प०, जिघांसायाम् (द्रोह करना), लट्–द्रुह्यति, लिट्–दुद्रोह, (म० पु० एक० दुद्रोहिथ, दुद्रोढ, दुद्रोग्ध), लुट्–द्रोहिता, द्रोग्धा, द्रोढा, लृट्–द्रोहिष्यति, ध्रोक्ष्यति, लृङ्–अद्रोहिष्यत्, अध्रोक्ष्यत्, लुङ्–अद्रुहत् । सन्–दुद्रोहिषति, दुदुहिषति, दुध्रुक्षति, णिच्–लट्–द्रोहयति–ते, लुङ्–अदुद्रुहत्–त, क्त–द्रुग्ध, या द्रूढ, तुम्–द्रोहितुम्, द्रोग्धुम्, द्रोढुम्, क्त्वा–द्रुहित्वा, द्रोहित्वा, द्रुग्ध्वा, द्रुढ्वा ।

द्रू—९ उ०, हिंसायाम् (मारना, चोट पहुँचाना), लट्–द्रूणाति, द्रूणीते, लिट्–दुद्राव, दुद्रुवे, लृट्–द्रविष्यति–ते, लुङ्–अद्रावीत्, अद्रविष्ट ।

द्रेक्—१ आ०, शब्दोत्साहयो (शब्द करना, उत्साह दिखाना), लट्–द्रेकते, लिट्–दिद्रेके, लृट्–द्रेकिष्यते, लुङ्–अद्रेकिष्ट ।

द्रै—१ प०, स्वप्ने (सोना), (साधारणतया नि के साथ) लट्–द्रायति, लिट्–दद्रौ, लुङ्–अद्रासीत्, आ० लिङ्–द्रायात्, द्रेयात् ।

द्विष्—२ उ०, अप्रीतौ (द्वेष करना, घृणा करना), लट्–द्वेष्टि, द्विष्टे, लङ्–अद्वेट्–ड् (अन्य पु०, बहु० अद्विषन्–षु), लिट्–दिद्वेष, दिद्विषे, लुट्–द्वेष्टा, लृट्–द्वेक्ष्यति–ते, लृङ्–अद्वेक्ष्यत्–त, लुङ्–अद्विक्षत्–त, आ० लिङ्–द्विष्यात्, द्विक्षीष्ट । सन्–दिद्विक्षति–ते, णिच्–लट्–द्वेषयति–ते, लुङ्–अदिद्विषत्–त, यङन्त–देद्विष्यते, देद्वेष्टि, देद्विषिति, कर्म० लट्–द्विष्यते, लुङ्–अद्वेषि, क्त–द्विष्ट, तुम्–द्वेष्टुम् ।

द्वृ—१ प०, संवरणे अंगीकृतौ च (ढकना, स्वीकार करना), लट्–द्वरति, लिट्–दद्वार, लुङ्–अद्वार्षीत् ।

ध

धक्क्—१० उ०, नाशने (नष्ट करना), लट्–धक्कयति–ते, लिट्–धक्कयाचकार–चक्रे, लुङ्–अदधक्कत्–त ।

धण्—१ प०, शब्दे (शब्द करना), लिट्–धणति लुङ्–अधणीत्, अधाणीत् ।

धन्—१ प० (शब्द करना), लट्–धनति ।
धन्—(वैदिक), ३ प०, धान्ये (धन उत्पन्न करना), लट्–दधन्ति,
दधन्त, दधनति, लिट्–दधान, लृट्–धनिष्यति ।
धन्व्—१ प०, गतौ (जाना), लट्–धन्वति, लिट्–दधन्व, लुङ्–अधन्वीत् ।
धा—३ उ०, धारणपोषणयोर्दाने च (रखना, उत्पन्न करना, देना, धारण
करना), लट्–दधाति, धत्ते, लिट्–दधौ और दधे, लुट्–धाता, लृट्–धास्यति–
ते, लङ्–अधास्यत्–त, लुङ्–अधात, अधित, आ० लिङ्–धेयात्, धासीष्ट ।
सन्–धित्सति–ते, कर्म० लट्–धीयते, लुङ्–अधायि, णिच्–लट्–धापयति–ते,
लुङ्–अदीधपत्–त, यङन्त–देधीयते, दाधाति, दाधेति, क्त–हित, क्त्वा–हित्वा,
ल्यप्–सधाय ।
धाव्—१ उ०, गतिशुद्ध्योः (रगड़ना, स्वच्छ करना, दौड़ना), लट्–
धावति–ते, लिट्–दधाव, दधावे, लुट्–धाविता, लृट्–धाविष्यति–ते, लृङ्–अधावि-
ष्यत्–त, लुङ्–अधावीत्—अधाविष्ट, आ० लिङ्–धाव्यात्, धाविषीष्ट । सन्
–दिधाविषति–ते, णिच्–लट्–धावयति–ते, लुङ्–अदीधवत्–त, क्त–धावित,
धौत, क्त्वा–धावित्वा, धौत्वा, ल्यप्–प्रधाव्य ।
धि—६ प०, धारणे (रखना, धारण करना), लट्–धियति, लिट्–दिधाय,
लुङ्–अधैषीत्, सन्–दिधिषति ।
धिक्ष्—१ आ०, सदीपनक्लेशनजीवनेषु (जलाना, थकना, जीवित रहना),
लट्–धिक्षते, लिट्–दिधिक्षे, लृट्–धिक्षिष्यते, लुङ्–अधिक्षिष्ट ।
धिन्व्—१ प०, प्रीणने (प्रसन्न होना, प्रसन्न करना), लट्–धिनोति,
लिट्–दिधिन्व, लुट्–धिन्विता, लुङ्–अधिन्वीत्, आ० लिङ्–धिन्व्यात् । क्त–
धिन्वित ।
धिष्—३ प०, (शब्द करना), लट्–दिधेष्टि (वेदों में ही प्रयोग होता है)।
धी—४ आ०, आधारे (रखना, पकड़ना), लट्–धीयते, लिट्–दिध्ये,
लृट्–धेष्यते, लुङ्–अधेष्ट । णिच्–लट्–धाययति–ते, लुङ्–अदीधयत्–त, सन्–
दिधीषते, क्त–धीन ।
धु—५ उ०, कम्पने (हिलाना, उत्तेजित करना), लट्–धुनोति, धुनुते,
लिट्–दुधाव, दुधवे, लुट्–धोता, लृट्–धोष्यति–ते, लृङ्–अधोष्यत्–त, आ० लिङ्–
धूयात्, धूषीष्ट, लुङ्–अधौषीत्, अधोष्ट । सन्–दुधूषति–ते, क्त–धुत ।
धुक्ष्—१ आ०, सदीपनक्लेशनजीवनेषु (जलना, व्याकुल होना, जीवित
रहना), लट्–धुक्षते, लिट्–दुधुक्षे, लुट्–धुक्षिता, लुङ्–अधुक्षिष्ट । सन्–दुधु-
क्षिषते, क्त–धुक्षित ।
धू—१ उ०, कम्पने और ६ प० विधूनने (हिलाना), लट्–धवति–ते,
धुवति, लिट्–दुधाव, दुधुवे, (धूतुदादि० कुटादि में है, दुधुविय म० पु० एक०),
लुट्–धविता, धुविता, लृट्–धविष्यति–ते, धुविष्यति, लृङ्–अधविष्यत्–त ।

अधुविष्यत्, लुङ्–अधावीत्, अधविष्ट, अधुवीत्, आ० लिङ्–धूयात्, धविषीष्ट, क्त–धूत, तुम्–धवितुम् (१), धुवितुम् (६) ।

धू—५, ६ उ०, कम्पने (हिलाना, कँपाना), लट्–धूनोति, धूनुते, धुनाति, धुनोते, लिट्–दुधाव, दुधुवे, लुट्–धोता, धविता, लृट्–धोष्यति–ते, धविष्यति–ते, लृङ्–अधोष्यत्–त, अधविष्यत्–त, लुङ्–अधावीत्, अधविष्ट, अधोष्ट, आ० लिङ्–धूयात्, धविषीष्ट, धोषीष्ट, सन्–दुधूषति–ते, णिच्–धूनयति, लुङ्–अदूधुनत्, कर्म० लट्–धूयते, लुङ्–अधावि, क्त–धूत (५), धून (६) ।

धू—१० उ०, (हिलाना), लट्–धूनयति–ते, लिट्–धूनयाचकार–चक्रे, लृट्–धूनयिष्यति–ते, लुङ्–अदूधुनत्, आ० लिङ्–धून्यात्, धूनयिषीष्ट, णिच्–लट्–धूनयति, सन्–दुधूनयिषति–ते ।

धूप्—१ प०, सतापे (तपाना, तपना), लट्–धूपायति, लिट्–दुधूप, धूपायाचकार, लुट्–धूपिता, धूपायिता, लृट्–धूपिष्यति, धूपायिष्यति, लृङ्–अधूपिष्यत्, अधूपायिष्यत्, लुङ्–अधूपीत्, अधूपायीत्, आ० लिङ्–धूप्यात्, धूपाय्यात् । णिच् लट्–धूपयति–ते, धूपाययति–ते, लुङ्–अदुधूपत्–त, अदुधूपायत्–त, सन्–दुधूपिषति, दुधूपायिषति, कर्म० लट्–धूप्यते, धूपाय्यते, लुङ्–अधूपायि, अधूपि, क्त–धूपित, धूपायित ।

धूप्—१० उ०, भाषाया दीप्तौ च (बोलना, चमकना), लट्–धूपयति–ते, लिट्–धूपयाचकार–चक्रे, लुट्–धूपयिता, लुङ्–अदूधुपत्–त ।

धूर्—४ आ०, हिंसागत्यो (मारना, जाना), लट्–धूर्यते, लिट्–दुधूरे, लुङ्–अधूरिष्ट । क्त–धूर्त ।

धृ—१ उ०, धारणे (धारण करना), लट्–धरति–ते, लिट्–दधार, दध्रे (म० पु० एक० दधर्थ, दध्रिषे), लुट्–धर्ता, लृट्–धरिष्यति–ते, लृङ्–अधरिष्यत्–त, लुङ्–अधार्षीत, अधृत, आ० लिङ्–ध्रियात्, धृषीष्ट । सन्–दिधीर्षति–ते, णिच् लट्–धारयति–ते, लुङ्–अदीधरत्–त, कर्म० ध्रियते, क्त–धृत ।

धृ—१ आ०, अवध्वसने (नष्ट करना), लट्–धरते । (शेष पूर्ववत्) ।

धृ—६ आ०, अवस्थाने (होना, विद्यमान होना), लट्–ध्रियते, । सन्–दिधरिषते । (शेष रूपो के लिए धृ १ उ० के आत्मने० के रूप देखो) ।

धृ—१० उ०, धारणे (रखना, धारण करना), लट्–धारयति–ते, लिट्–धारयाचकार–चक्रे, लुट्–धारयिता, लुङ्–अदीधरत्–त, आ० लिङ्–धार्यात्, धारयिषीष्ट । सन्–दिधारयिषति–ते, कर्म०–धार्यते, लुङ्–अधारि ।

धृज्, धृञ्ज्—१ प०, गतौ (जाना, हिलना), लट्–धर्जति, धृञ्जति, लिट्–दधर्ज, दधृञ्ज, लुङ्–अधर्जीत, अधृञ्जीत् ।

धृष्—१ प० (एकत्र होना, चोट पहुँचाना), लट्–धर्षति, लिट्–दधर्ष, क्त–धर्षित ।

धृष—५ प०, प्रागल्भ्ये (निडर होना, धृष्ट होना, गर्वयुक्त या वीर होना)
लट्–धृष्णोति, लिट्–दधर्ष, लुट्–धर्षिता, लृट्–धर्षिष्यति, लृङ्–अधर्षिष्यत,
लुङ्–अधर्षीत् । णिच् लट्–धर्षयति–ते, लुङ्–अदीधृषत्–त, अदधर्षत्–त, सन्–
दिधर्षिषति, क्त–धर्षित, धृष्ट (अशिष्ट) ।

धृष्—१ प०, १० उ०, प्रहसने (आक्रमण करना, अपमान करना, जीतना),
लट्–धर्षति, धर्षयति–ते, लिट्–दधर्ष, धर्षयाचकार–चक्रे, लुङ्–अधर्षीत्, अदी-
धृषत्–त, अदधर्षत्–त। आ० लिङ्–धृष्यात्, धर्ष्यात्, धर्षयिषीष्ट । सन्–दिध-
र्षिषति, दिधर्षयिषति–ते ।

धॄ—९ प०, (वृद्ध होना), लट्–धृणाति, लृट्–धरिष्यति, धरीष्यति, लुङ्
–अधारीत् ।

धे—१ प०, पाने (पीना, चूसना, सींचना), लट्–धयति, लिट्–दधौ
लुट्–धाता, लुङ्–अधात्, अधासीत्, अदधत्, आ० लिङ्–धेयात् । सन्–धित्सति,
कर्म० लट्–धीयते, लुङ्–अधायि, णिच्–लट्–धापयते (परस्मै० भी है, यदि
स्व या कर्ता का अर्थ न हो तो, वत्सान् धापयति पय), लुङ्–अदीधपत्, क्त–
धीत ।

धोर्—१ प०, गतिचातुर्ये (चतुरता से चलना, चतुर होना), लट्–धोरति
लिट्–दुधोर, लुङ्–अधोरीत् ।

ध्मा—१ प०, शब्दाग्निसंयोगयो: (फूंकना, सांस बाहर छोड़ना, फेंकना),
लट्–धमति, लिट्–दध्मौ, लुट्–ध्माता, लृट्–ध्मास्यति, लृङ्–अध्मास्यत्, लुङ्–
अध्मासीत्, आ० लिङ्–ध्मायात्, ध्मेयात्, सन्–दिध्मासति, कर्म० लट्–ध्मायते,
लुङ्–अध्मायि, णिच् लट्–ध्मापयति–ते, लुङ्–अदिध्मपत्–त, क्त–ध्मात ।

ध्यै—१ प०, चिन्तायाम् (सोचना, ध्यान करना), लट्–ध्यायति, लिट्
–दध्यौ, लुट्–ध्याता, लृट्–ध्यास्यति, लृङ्–अध्यास्यत्, लुङ्–अध्यासीत्, आ०
लिङ्–ध्येयात्–ध्यायात् । सन्–दिध्यासति, कर्म० लट्–ध्यायते, लुङ्–अध्यायि
णिच्–लट्–ध्यापयति–ते, लुङ्–अदिध्यपत्–त, यङन्त–दाध्यायते, दाध्याति,
दाध्येति, क्त–ध्यात, क्त्वा–ध्यात्वा, तुम्–ध्यातुम् ।

ध्रज् (ध्रञ्ज्), १ प०, गतौ (जाना), लट्–ध्रजति या ध्रञ्जति, लिट्–
दध्राज, दध्रञ्ज, लुङ्–अध्रजीत्, अध्राजीत्, अध्रञ्जीत् ।

ध्रण्—१ प०, शब्दे (शब्द करना, ढोल पीटना), लट्–ध्रणति, लिट्–
दध्राण, लृट्–ध्रणिष्यति, लुङ्–अध्रणीत्, अध्राणीत् ।

ध्रस्—९ प०, उञ्छे (कण चुनना), लट्–ध्रस्नाति, लिट्–दध्रास, लृट्–
ध्रसिष्यति, लुङ्–अध्रसीत्, अध्रासीत् । क्त–ध्रस्त ।

ध्रस्—१० उ०, १ प०, (कण चुनना), लट्–ध्रासयति–ते, ध्रसति,
लिट्–ध्रासयाचकार–चक्रे, दध्रास, लुट्–ध्रासयिता, ध्रसिता, लुङ्–अदिध्रसत्–
त, अध्रसीत्, अध्रासीत् ।

ध्राक्ष्—१ प० (चाहना, शब्द करना), लट्–ध्राक्षति ।

ध्राघ्—१ आ०, सामर्थ्ये (समर्थ होना), लट्–ध्राघते, लिट्–दध्राघे, लुङ्–अध्राघिष्ट ।

ध्राड्—१ आ०, विशरणे (काटना, फाड़ना), लट्–ध्राडते, लुङ्–अध्राडिष्ट ।

ध्रिज्—१ प०, (जाना), लट् ध्रेजति, लृट्–ध्रेजिष्यति, लुङ्–अध्रेजीत् ।

ध्रु—१ प०, (दृढ होना), लट्–ध्रवति, लिट्–दुध्राव, लुट्–ध्रोता, लुङ्–अध्रौषीत्, सन्–दुध्रूषति ।

ध्रु—६ प० (कुटादि) गति स्थैर्ययो (जाना, स्थिर होना), लट्–ध्रुवति, लिट्–दुध्राव, (म० पु० एक० दुध्रुविथ, दुध्रुथ) लृट्–ध्रुष्यति, लुङ्–अध्रुवीत् ।

ध्रुव्—(पूर्वोक्त धातु का ही रूपान्तर), लट्–ध्रुवति, लिट्–दुध्राव, (म० पु० एकवचन मे दुध्रुविथ), लृट्–ध्रुविष्यति, लुङ्–अध्रुवीत् ।

ध्रै—१ प०, तृप्तौ (सन्तुष्ट होना), लट्–ध्रायति, लिट्–दध्रौ, लुङ्–अध्रासीत्, आ० लिङ्–ध्रायात्, ध्रेयात् ।

ध्वस्—१ आ०, अवस्रसने गतौ च (गिरना, नष्ट होना), लट्–ध्वसते, लिट्–दध्वसे, लुट्–ध्वसिता, लृट्–ध्वसिष्यते, लङ्–अध्वसिष्यत्, लुङ्–अध्वसत्, अध्वसिष्ट, आ० लिङ्–ध्वसिषीष्ट । सन्–दिध्वसिषते, कर्म० लट्–ध्वस्यते, लुङ्–अध्वसि, णिच् लट्–ध्वसयति–ते, क्त–ध्वस्त, क्त्वा–ध्वसित्वा, ध्वस्त्वा ।

ध्वज्-ध्वञ्ज्—१ प० (जाना), लट्–ध्वजति, ध्वञ्जति ।

ध्वन्—१ प०, शब्दे (शब्द करना, प्रतिध्वनि होना, गरजना), लट्–ध्वनति, लिट्–दध्वान, लुट्–ध्वनिता, लृट्–ध्वनिष्यति, लङ्–अध्वनिष्यत्, लुङ्–अध्वनीत् या अध्वानीत् । णिच्–लट्–ध्वनयति–ते (अस्पष्ट ध्वनि करना), ध्वानयति–ते, सन्–दिध्वनिषति, क्त–ध्वनित, ध्वान्त (अन्धेरा) ।

ध्वन्—१० उ०, अव्यक्ते शब्दे (अस्पष्ट शब्द कहना), लट्–ध्वनयति–ते, लुङ्–अदध्वनन्–त, सन्–दिध्वनयिषति–ते, कर्म० लट्–ध्वन्यते, लुङ्–अध्वनि ।

ध्वृ—१ प०, मूर्च्छने (हिंसा करना, प्रशंसा करना, वर्णन करना), लट्–ध्वरति, लिट्–दध्वार, लुङ्–अध्वार्षीत् ।

न

नक्क्—१० उ०, नाशने (नष्ट होना), लट्–नक्कयति–ते, लुङ्–अननक्कत्–त ।

नख्—१ प० (जाना, हिलना), लट्–नखति, लिट्–ननख, लुङ्–अनखीत् ।

नग्—१ प० (जाना), लट्–नगति, लुङ्–अनगीत् अनागीत् ।

¹नट्—१ प०, नाट्ये (नाचना, अभिनय करना), लट्–नटति, लिट्–ननाट, लुट्–नटिता, लृट्–नटिष्यति, लङ्–अनटिष्यत्, लुङ्–अनटीत्–अनाटीत् । णिच्–लट्–नाटयति–ते (प्रनाट०), लुङ्–अनीनटत्–त, सन्–निनटिषति, कर्म० लट्–नट्यते, लुङ्–अनाटि, अनटि, क्त–नटित ।

नट्—१० उ०, भाषायाम् (कहना, चमकना), लट्–नाटयति–ते ।

नद्—१ प०, अव्यक्ते शब्दे (शब्द करना, गरजना), लट्–नदति, लिट्–ननाद, लुट्–नदिता, लुङ्–अनादीत्, अनदीत् । णिच् लट्–नादयति–ते, लुङ्–अनीनदत्–त, सन्–निनदिषति, क्त–नदित ।

नद्—१० उ० (कहना, चमकना), लट्–नादयति–ते ।

नन्द्—१ प०, समृद्धौ (आनन्दित होना), लट्–नन्दति, लिट्–ननन्द, लुट्–नन्दिता, लुङ्–अनन्दीत्, आ० लिङ्–नन्द्यात् । सन्–निनन्दिषति, क्त–नन्दित, णिच् लट्–नन्दयति–ते, कर्म० लट्–नन्द्यते ।

नभ्—१ आ०, हिंसायाम् अभावेऽपि (हिंसा करना, हानि पहुँचाना), लट्–नभते, लिट्–नेभे, लुङ्–अनभत्, अनभिष्ट ।

नम्—१ प०, प्रह्वत्वे शब्दे च (प्रणाम करना, झुकना, शब्द करना), लट्–नमति, लिट्–ननाम, लुट्–नन्ता, लृट्–नंस्यति, लङ्–अनंस्यत्, लुङ्–अनंसीत्, आ० लिङ्–नम्यात्, सन्–निनंसति, णिच् लट्–नमयति–नामयति, लुङ्–अनीनमत्–त, कर्म० लट्–नम्यते, लुङ्–अनामि, क्त–नत, क्त्वा–नत्वा, तुम्–नन्तुम् ।

नय्—१ आ० (जाना, रक्षा करना), लट्–नयते, लिट्–नेये, लुङ्–अनयिष्ट ।

नर्द्—१ प०, शब्दे (शब्द करना, गरजना, चिंघाड़ना), लट्–(प्र) णर्दति, लिट्–ननर्द, लुट्–नर्दिता, लृट्–नर्दिष्यति, लङ्–अनर्दिष्यत्, लुङ्–अनर्दीत् । सन्–निनर्दिषति, क्त–नर्दित ।

नल्—१ प०, गन्धे बन्धने च (सूँघना, बाँधना), लट्–नलति, लिट्–ननाल, लृट्–नलिष्यति, लुङ्–अनालीत् ।

नल्—१० उ०, भाषायाम् (कहना), लट्–नालयति–ते लृट्–नालयिष्यति–ते, लुङ्–अनीनलत्–त ।

नश्—४ प०, अदर्शने (नष्ट होना, लुप्त होना), लट्–नश्यति, लिट्–ननाश, लुट्–नशिता, नष्टा, लृट्–नशिष्यति, नङ्क्ष्यति, लङ्–अनशिष्यत्, अनङ्क्ष्यत्, लुङ्–अनशत्, आ० लिङ्–नश्यात् । सन्–निनङ्क्षति, निनशिषति, णिच्–लट्–नाशयति–ते, लुङ्–अनीनशत्–त, क्त–नष्ट, क्त्वा–नष्ट्वा, नंष्ट्वा, नशित्वा, तुम्–नशितुम्–नष्टुम् ।

नह्—४ उ०, बन्धने (बाँधना), लट्–नह्यति–ते, लिट्–ननाह, नेहे, लुट्–नद्धा, लृट्–नत्स्यति–ते, लङ्–अनत्स्यत्–त, लुङ्–अनात्सीत्, अनद्ध, आ० लिङ्–

ध्राक्ष्—१ प० (चाहना, शब्द करना), लट्–ध्राक्षति ।

ध्राघ्—१ आ०, सामर्थ्ये (समर्थ होना), लट्–ध्राघते, लिट्–दध्राघे, लुङ्–अध्राघिष्ट ।

ध्राड्—१ आ०, विशरणे (काटना, फाड़ना), लट्–ध्राडते, लुङ्–अध्राडिष्ट ।

ध्रिज्—१ प०, (जाना), लट् ध्रेजति, लृट्–ध्रेजिष्यति, लुङ्–अध्रेजीत।

ध्रु—१ प०, (दृढ होना), लट्–ध्रवति, लिट्–दुध्राव, लुट्–ध्रोता, लुङ्–अध्रौषीत्, सन्–दुध्रूषति ।

ध्रु—६ प० (कुटादि) गति स्थैर्ययो (जाना, स्थिर होना), लट्–ध्रुवति, लिट्–दुध्राव, (म० पु० एक० दुध्रुविथ, दुध्रुथ) लृट्–ध्रुष्यति, लुङ्–अध्रुवीत्।

ध्रुव्—(पूर्वोक्त धातु का ही रूपान्तर), लट्–ध्रुवति, लिट्–दुध्राव, (म० पु० एकवचन में दुध्रुविथ), लृट्–ध्रुविष्यति, लुङ्–अध्रुवीत् ।

ध्रै—१ प०, तृप्तौ (सन्तुष्ट होना), लट्–ध्रायति, लिट्–दध्रौ, लुङ्–अध्रासीत्, आ० लिङ्–ध्रायात्, ध्रेयात् ।

ध्वस्—१ आ०, अवस्रंसने गतौ च (गिरना, नष्ट होना), लट्–ध्वसते, लिट्–दध्वसे, लुट्–ध्वसिता, लृट्–ध्वसिष्यते, लृङ्–अध्वसिष्यत्, लुङ्–अध्वसत्, अध्वसिष्ट, आ० लिङ्–ध्वसिषीष्ट । सन्–दिध्वसिषते, कर्म० लट्–ध्वस्यते, लुङ्–अध्वसि, णिच् लट्–ध्वसयति–ते, क्त–ध्वस्त, क्त्वा–ध्वसित्वा, ध्वस्त्वा ।

ध्वज्-ध्वञ्ज्—१ प० (जाना), लट्–ध्वजति, ध्वञ्जति ।

ध्वन्—१ प०, शब्दे (शब्द करना, प्रतिध्वनि होना, गरजना), लट्–ध्वनति, लिट्–दध्वान, लुट्–ध्वनिता, लृट्–ध्वनिष्यति, लृङ्–अध्वनिष्यत्, लुङ्–अध्वनीत् या अध्वानीत् । णिच्–लट्–ध्वनयति–ते (अस्पष्ट ध्वनि करना), ध्वानयति–ते, सन्–दिध्वनिषति, क्त–ध्वनित, ध्वान्त (अन्धेरा) ।

ध्वन्—१० उ०, अव्यक्ते शब्दे (अस्पष्ट शब्द कहना), लट्–ध्वनयति–ते, लुङ्–अदध्वनत्–त, सन्–दिध्वनयिषति–ते, कर्म० लट्–ध्वन्यते, लुङ्–अध्वनि ।

ध्वृ—१ प०, मूर्च्छने (हिंसा करना, प्रशंसा करना, वर्णन करना), लट्–ध्वरति, लिट्–दध्वार, लुङ्–अध्वार्षीत् ।

न

नक्क्—१० उ०, नाशने (नष्ट होना), लट्–नक्कयति–ते, लुङ्–अननक्कत्–त ।

नक्ष्—१ प० (जाना, हिलना), लट्–नक्षति, लिट्–ननक्ष, लुङ्–अनक्षीत् ।

नख्—१ प० (जाना), लट्–नखति, लुङ्–अनखीत् अनाखीत् ।

*नट्—१ प०, नाट्ये (नाचना, अभिनय करना), लट्–नटति, लिट्–ननाट, लुट्–नटिता, लृट्–नटिष्यति, लृङ्–अनटिष्यत्, लुङ्–अनटीत्–अनाटीत् । णिच् लट्–नाटयति–ते (प्रनाट०), लुङ्–अनीनटत्–त, सन्–निनटिषति, कर्म० लट्–नट्यते, लुङ्–अनाटि, अनटि, क्त–नटित ।

नट्—१० उ०, भाषायाम् (कहना, चमकना), लट्–नाटयति–ते ।

नद्—१ प०, अव्यक्ते शब्दे (शब्द करना, गरजना), लट्–नदति, लिट्–ननाद, लुट्–नदिता, लुङ्–अनादीत्, अनदीत् । णिच् लट्–नादयति–ते, लुङ्–अनीनदत्–त, सन्–निनदिषति, क्त–नदित ।

नद्—१० उ० (कहना, चमकना), लट्–नादयति–ते ।

नन्द्—१ प०, समृद्धौ (आनन्दित होना), लट्–नन्दति, लिट्–ननन्द, लुट्–नन्दिता, लुङ्–अनन्दीत्, आ० लिङ्–नन्द्यात् । सन्–निनन्दिषति, क्त–नन्दित, णिच् लट्–नन्दयति–ते, कर्म० लट्–नन्द्यते ।

नभ्—१ आ०, हिंसायाम् अभावेऽपि (हिंसा करना, हानि पहुँचाना), लट्–नभते, लिट्–नेभे, लुङ्–अनभत्, अनभिष्ट ।

नम्—१ प०, प्रह्वत्वे शब्दे च (प्रणाम करना, झुकना, शब्द करना), लट्–नमति, लिट्–ननाम, लुट्–नन्ता, लृट्–नस्यति, लृङ्–अनस्यत्, लुङ्–अनसीत्, आ० लिङ्–नम्यात्, सन्–निनसति, णिच् लट्–नमयति–नामयति, लुङ्–अनीनमत्–त, कर्म० लट्–नम्यते, लुङ्–अनामि, क्त–नत, क्त्वा–नत्वा, तुम्–नन्तुम् ।

नय्—१ आ० (जाना, रक्षा करना), लट्–नयते, लिट्–नेये, लुङ्–अनयिष्ट ।

नर्द्—१ प०, शब्दे (शब्द करना, गरजना, चिंघाडना), लट्–(प्र) नर्दति, लिट्–ननर्द, लुट्–नर्दिता, लृट्–नर्दिष्यति, लृङ्–अनर्दिष्यत्, लुङ्–अनर्दीत् । सन्–निनर्दिषति, क्त–नर्दित ।

नल्—१ प०, गन्धे बन्धने च (सूँघना, बाँधना), लट्–नलति, लिट्–ननाल, लृट्–नलिष्यति, लुङ्–अनालीत् ।

नल्—१० उ०, भाषायाम् (कहना), लट्–नालयति–ते लृट्–नालयिष्यति–ते, लुङ्–अनीनलत्–त ।

नश्—४ प०, अदर्शने (नष्ट होना, लुप्त होना), लट्–नश्यति, लिट्–ननाश, लुट्–नशिता, नष्टा, लृट्–नशिष्यति, नङ्क्ष्यति, लृङ्–अनशिष्यत्, अनङ्क्ष्यत्, लुङ्–अनशत्, आ० लिङ्–नश्यात् । सन्–निनङ्क्षति, निनशिषति, णिच् लट्–नाशयति–ते, लुङ्–अनीनशत्–त, क्त–नष्ट, क्त्वा–नष्ट्वा, नंष्ट्वा, नशित्वा, तुम्–नशितुम्–नष्टुम् ।

नह्—४ उ०, बन्धने (बाँधना), लट्–नह्यति–ते, लिट्–ननाह, नेहे, लुट्–नद्धा, लृट्–नत्स्यति–ते, लृङ्–अनत्स्यत्–त, लुङ्–अनात्सीत्, अनद्ध, आ० लि

नह्यात्–नत्सीष्ट । सन्–निनत्सति–ते, कर्म०–लट्–नह्यते, लुङ्–अनाहि, णिच् लट्–नाहयति–ते, लुङ्–अनीनहत्–त, यङन्त–नानह्यते, नानहीति, नानद्धि, क्त–नद्ध, क्त्वा–नद्ध्वा, तुम्–नद्धुम् ।

नाथ्—१ प०, याच्ञोपतापैश्वर्याशीःषु (माँगना, स्वामी होना, तंग करना), लट्–नाथति, लिट्–ननाथ, लुट्–नाथिता, लुङ्–अनाथीत्, (१ आ०, आशीर्वाद देना), लट्–नाथते, लिट्–ननाथे, लुट्–नाथिता, लुङ्–अनाथिष्ट, क्त–नाथित ।

नाध्—१ आ० (नाथ् के तुल्य) ।

निज्—३ उ०, शौचपोषणयोः (धोना, पवित्र होना, पालन करना), लट्–नेनेक्ति, नेनिक्ते, लिट्–निनेज, निनिजे, लुट्–नेक्ता, लृट्–नेक्ष्यति–ते, लङ्–अनेनेक्–ग्, लुङ्–अनिजत्, अनैक्षीत्, अनिक्त, आ० लिङ्–निज्यात्, निक्षीष्ट । सन्–निनिक्षति–ते, कर्म० लट्–निज्यते, लुङ्–अनेजि, णिच्–लट्–नेजयति–ते, लुङ्–अनेनिजत्–त, क्त–निक्त, क्त्वा–निक्त्वा ।

निञ्ज्—२ आ०, शुद्धौ (धोना, स्वच्छ करना), लट्–निङ्क्ते (प्रणिङ्क्ते), लिट्–निनिञ्जे, लृट्–निञ्जिष्यते, लुङ्–अनिञ्जिष्ट, आ० लिङ्–निञ्जिषीष्ट । सन्–निनिञ्जिषते, णिच्–लट्–निञ्जयति–ते, कर्म०–लट्–निञ्ज्यते, लुङ्–अनिञ्जि, क्त–निञ्जित ।

निन्द्—१ प०, कुत्सायाम् (निन्दा करना, दोष निकालना), लट्–निन्दति, लिट्–निनिन्द, लुट्–निन्दिता, लुङ्–अनिन्दीत्, आ० लिङ्–निन्द्यात् । सन्–निनिन्दिषति, णिच् लट्–निन्दयति–ते, लुङ्–अनिनिन्दत्–त, कर्म० लट्–निन्द्यते, क्त–निन्दित ।

निद्—१ उ०, कुत्सासन्निकर्षयोः (दोष देना, पहुँचाना), लट्–नेदति–ते, लिट्–निनेद, निनिदे, लुङ्–अनेदीत्, अनेदिष्ट ।

निन्व्—१ प०, सेचने सेवने च (सींचना, खाना), लट्–निन्वति, लिट्–निनिन्व, लुङ्–अनिन्वीत् ।

निल्—६ प०, गहने (घना होना), लट्–निलति, लिट्–निनेल, लृट्–नेलिष्यति, लुङ्–अनेलीत् ।

निश्—१ प०, समाधौ (सोचना, चिन्तन करना), लट्–नेशति, लृट्–नेशिष्यति, लुङ्–अनेशीत् ।

निष्—१ प०, सेचने (सींचना), लट्–नेषति, लिट्–निनेष, लुङ्–अनेषीत् ।

निष्क—१० आ०, परिमाणे (तौलना, नापना), लट्–निष्कयते, लिट्–निष्कयांचक्रे, लृट्–निष्कयिष्यते, लुङ्–अनिनिष्कत ।

निस्—२ आ०, चुम्बने (चूमना), लट्–निस्ते, लिट्–निनिसे, लृट्–निसिष्यते, लुङ्–अनिसिष्ट ।

नी—१ उ०, प्रापणे (ले जाना, ढोना, निर्वाह करना, रहना), लट्–नयति–ते, लिट्–निनाय निन्ये, लुट्–नेता, लृट्–नेष्यति–ते, लुङ्–अनैषीत्–त,

लुङ्-अनैषीत्, अनेष्ट, आ० लिङ्-नीयात्, नेषीष्ट । सन्-निनीषति-ते, कर्म० लट्-नीयते, लुङ-अनायि, णिच्-लट्-नाययति-ते, लुङ-अनीनयत्-त, यङन्त-नेनीयते, नेनयीति, नेनेति, क्त-नीत, क्त्वा-नीत्वा, तुम्-नेतुम् ।

नील्--१ प०, वर्णे (रंग लगाना), लट्-नीलति, लुङ-अनीलीत् ।

नीव्--१ प०, स्थौल्ये (मोटा होना, बढ़ना), लट्-नीवति, लिट्-निनीव, लुङ-अनीवीत् ।

नु--२ प०, स्तुतौ (स्तुति करना), लट्-नौति, लिट्-नुनाव, लुट्-नविता, लृट्-नविष्यति, लृङ-अनविष्यत्, लुङ-अनावीत् । सन्-नुनूषति, णिच्-लट्-नावयति-ते, लुङ-अनूनवत्-त, सन्-नुनावयिषति-ते, क्त-नुत ।

नुद्--६ उ०, प्रेरणे (प्रेरणा देना, धक्का देना, हटाना, फेंकना), लट्-नुदति-ने, लिट्-नुनोद, नुनुदे, लुट्-नोत्ता, लृट्-नोत्स्यति-ते, लृङ-अनोत्स्यत्-त, लुङ-अनौत्सीत्, अनुत्त, आ० लिङ-नुद्यात्, नुत्सीष्ट । सन्-नुनुत्सति-ते, णिच्-लट्-नोदयति-ते, लुङ-अनूनुदत्-त, कर्म०-लट्-नुद्यते, लुङ-अनोदि, क्त-नुत्त-नुन्न ।

नू--६ प०, स्तुतौ (कुटादि) (प्रशंसा करना), लट्-नुवति, लिट्-नुनाव, (म० पु० एक० नुनुविथ), लुट्-नुविता, लृट्-नुविष्यति, लुङ-अनुवीत् । सन्-नुनूषति, णिच्-लट्-नावयति-ते, लुङ-अनूनवत्-त, क्त-नूत, तुम्-नुवितुम् ।

नृत--४ प०, गात्रविक्षेपे (नाचना, अभिनय दिखाना), लट्-नृत्यति, लिट्-ननर्त, लुट्-नर्तिता, लुङ-अनर्तीत्, आ० लिङ-नृत्यात् । सन्-निनर्तिषति, निनृत्सति, कर्म० लट्-नृत्यते, लुङ-अनर्ति, णिच्-लट्-नर्तयते, लुङ-अनीनृतत, अननर्तत, क्त-नृत्त ।

नॄ--१, ९ प०, नये (ले जाना, आगे चलना), लट्-नृणाति, नरति, लुट्-नरिता, नरीता, लृट्-नरिष्यति, नरीष्यति, लुङ-अनारीत् । णिच्-नरयति-ते (नये), नारयति-ते (अन्यत्र) ।

नेष्--१ आ० (जाना, पहुँचना), लट्-नेषते, लिट्-निनेषे, लुङ-अनेषिष्ट ।

प

पक्ष्--१ प०, १० उ०, परिग्रहे (लेना, स्वीकार करना), लट्-पक्षति, पक्षयति-ने, लृट्-पक्षयिष्यति-ने, पक्षिष्यति, लुङ-अपक्षीत्, अपपक्षत्-त । सन्-पिपक्षिषति, पिपक्षयिषति-ने, णिच्-लट्-पक्षयति-ते ।

पच्--१ उ०, (पकाना, हजम करना), लट्-पचति-ते, लिट्-पपाच, पेचे, लुट्-पक्ता, लृट्-पक्ष्यति-ते, लृङ-अपक्ष्यत्-त, लुङ-अपाक्षीत्, अपक्त आ० लिङ-पच्यात्, पक्षीष्ट । सन्-पिपक्षति-ते, कर्म० लट्-पच्यते, लुङ-अपाचि, णिच्-लट्-पाचयति-ते, लुङ-अपीपचत्-त, क्त-पक्व ।

पञ्च्—१ आ०, व्यक्तीकरणे (स्पष्ट करना), लट्–पञ्चते, लिट्–पपञ्चे, लृट्–पञ्चिष्यते, लुङ–अपञ्चिष्ट ।

पञ्च्–१० उ०, १ प०, विस्तारवचने (फैलाना), लट्–पञ्चयति-ते, पञ्चति, लुङ–अपपञ्चत्-त, अपञ्चीत् ।

पट्—१ प० (जाना, हिलना), लट्–पटति, लिट्–पपाट, लुट्–पटिता, लृट्–पटिष्यति, लृङ–अपटिष्यत्, लुङ–अपटीत्-अपाटीत्, णिच्–लट् पाटयति-ते, लुङ–अपीपटत्–त । सन्–पिपटिषति ।

पट्—१० उ०, ग्रन्थे (कपडा पहनना, लपेटना), लट्–पटयति-ते, लिट्-पटयाचकार–चक्रे, लुट्–पटयिता, लुङ–अपपटत्-त । सन्–पिपटयिषति-ते ।

पट्—१० उ०, भाषाया वेष्टने च (कहना, ढकना), लट्–पाटयति-ते, लृट्–पाटयिष्यति-ते, लुङ–अपीपटत् त ।

पठ्—१ प०, व्यक्तायां वाचि लिखिताक्षरवाचने च (पढना, वर्णन करना), लट्—पठति, लिट्–पपाठ, लुट्–पठिता, लृट्–पठिष्यति, लृङ–अपठिष्यत्, लुङ–अपठीत्, अपाठीत् । सन्–पिपठिषति, कर्म० लट्–पठ्यते, लुङ–अपाठि, णिच्-लट्–पाठयति-ते, लुङ–अपीपठत्-त, क्त–पठित, क्त्वा–पठित्वा, तुम्-पठितुम् ।

पण्ड्—१ आ०, गतौ (जाना), लट्–पण्डते, लिट्–पपण्डे, लुङ–अपण्डिष्ट, क्त–पण्डित ।

पण्ड्—१० उ०, नाशने (नष्ट करना), १ प०, सहतौ च, (इकट्ठा करना, ढेर बनाना), लट्–पण्डयति-ते, पण्डति ।

पण्—१ आ०, व्यवहारे (खरीदना, बाजी लगाना), लट्–पणते, लिट्–पेणे, लुट्–पणिता, लुङ–अपणिष्ट, आ० लिङ–पणिषीष्ट । सन्–पिपणिषते, णिच् लट्–पाणयति-ते, लुङ–अपीपणत्-त, क्त–पणित ।

पण्—१ आ०, (पण्+आय पर० है), स्तुतौ (प्रार्थना करना), लट्–पणायति पणते, लिट्–पणायाचकार पेणे, लुट्–पणायिता, पणिता, लृट्–पणायिष्यति, पणिष्यते, लुङ–अपणायीत्, अपणिष्ट, आ० लिङ–पणाय्यात्, पणिषीष्ट । णिच् लट्–पणाययति-ते, पाणयति-ते, लुङ–अपपणायत्-त, अपीपणत् त । सन्–पिपणायिषति, पिपणिषते, क्त–पणायित ।

पत्—१ प० (गिरना, उडना, उतरना), लट्–पतति, लिट्–पपात, लुट्–पतिता, लृट्–पतिष्यति, लृङ–अपतिष्यत्, लुङ–अपप्तत्, आ० लिङ–पत्यात् । सन्–पित्सति, पिपतिषति, कर्म० लट्–पत्यते, लुङ–अपाति, णिच्–लट्–पातयति-ते, लुङ–अपीपतत्-त, यङन्त–पनीपत्यते, पनीपतीति, पनीपत्ति क्त–पतित, क्त्वा–पतित्वा, तुम्–पतितुम् ।

पत्—४ आ०, ऐश्वर्ये (स्वामी होना, शासन करना), लट्–पत्यते, लिट्–पेते, लुङ्–अपतिष्ट ।

पथ्—१ प० (जाना), लट्–पथति, लिट्–पपाथ, लुङ्–अपथीत् ।

पथ्—१० उ०, प्रक्षेपे (फेंकना, भेजना), लट्–पाथयति-ते, लुङ्–अपीपथत्-त ।

पद्—४ आ०, गतौ (जाना, पाना), लट्–पद्यते, लिट्–पेदे, लुट्–पत्ता, लृट्–पत्स्यते, लृङ्–अपत्स्यत्, लुङ्–अपादि, आ० लिङ्–पत्सीष्ट । सन्–पित्सते, कर्म० लट्–पद्यते, लुङ्–अपादि, णिच् लट्–पादयति-ते, लुङ्–अपीपदत्, क्त–पन्न, क्त्वा–पत्त्वा, तुम्–पत्तुम् ।

पद्—१० आ०, गतौ (जाना), लट्–पदयते, लिट्–पदयाञ्चक्रे, लृट्–पदयिष्यते, लुङ्–अपपदत । सन्–पिपदयिषते, कर्म० लट्–पद्यते, लुङ्–अपदि ।

पन्—१ आ० (प्रशंसा करना), लट्–पनते, पनायति, लिट्–पेने–पनायञ्चकार, लुट्–पनिता, पनायिता, लृट्–पनिष्यते, पनायिष्यति, लुङ्–अपनिष्ट, अपनायीत्, आ० लिङ्–पनिषीष्ट, पनाय्यात् । क्त–पनित, पनायित ।

पन्थ्—१० उ०, १ प०, (जाना) लट्–पन्थयति-ते, पन्थति, लुङ्–अपपन्थत्-त, अपन्थीत् ।

पय्—१ आ० (जाना, हिलना), लट्–पयते, लिट्–पेये, लुङ्–अपयिष्ट ।

पर्ण्—१० उ०, हरितभावे (हरा करना), लट्–पर्णयति-ते, लिट्–पर्णयाञ्चकार-चक्रे, लुट्–पर्णयिता, लुङ्–अपपर्णत्-त ।

पर्द्—१ आ० (अपानवायु छोडना), लट्–पर्दते, लिट्–पपर्दे, लुङ्–अपर्दिष्ट ।

पर्प्—१ प० (जाना), लट्–पर्पति, लिट्–पपर्प, लुङ्–अपर्पीत् ।

पर्व्—१ प० (जाना), लट्–पर्वति, लिट्–पपर्व ।

पर्व्—१ प०, पूरणे (पूरा करना), लट्–पर्वति, लिट्–पपर्व, लुङ्–अपर्वीत् ।

पल्—१ प० (जाना, हिलना), लट्–पलति, लिट्–पपाल, लुङ्–अपालीत् ।

पश्—१० उ०, बन्धने (बाँधना), लट्–पाशयति-ते, लुङ्–अपीपशत्-त, आ० लिङ्–पाश्यात्, पाशयिषीष्ट । सन्–पिपाशयिषति-ते ।

पष्—१० उ० (जाना), लट्–पषयति-ते ।

पस्—१० उ०, १ प०, नाशने (नष्ट होना), लट्–पसयति-ते, पसति लुट्–पसयिता–पसिता, लुङ्–अपपसत्-त, अपसीत् ।

पा—१ प०, पाने (पीना), लट्–पिबति, लिट्–पपौ, लुट्–पाता, लृट्–पास्यति, लृङ्–अपास्यत्, लुङ्–अपात्, आ० लिङ्–पेयात् । सन्–पिपासति, कर्म० लट्–पीयते, लुङ्–अपायि, णिच्–लट्–पाययति-ते, लुङ्–अपीप्यत्-त यङन्त–पेपीयते, पापाति, पापेति, क्त–पीत, क्त्वा, पीत्वा, तुम्–पातुम् ।

पा—२ प०, रक्षणे (रक्षा करना, शासन करना), लट्–पाति, लिट्–पपौ, लट्–पास्यति, लङ–अपात्, लुङ–अपासीत्, आ० लिङ–पायात् । सन्–पिपासति, कर्म० लट्–पायते, णिच्–लट्–पालयति-ते, लुङ–अपीपलत्-त, क्त–पीत ।

पार्—१० उ०, कर्मसमाप्तौ (पूरा करना, समर्थ होना, काम निपटाना), लट्–पारयति-ते, लिट्–पारयाचकार-चक्रे, लुट्–पारयिता, लृट्–पारयिष्यति-ते, लृङ–अपारयिष्यत्-त, लुङ–अपपारत्-त । कर्म० लट्–पार्यते, क्त–पारित ।

पाल्—१० उ०, रक्षणे (रक्षा करना), लट्–पालयति-ते, लिट्–पालयाचकार-चक्रे, लुट्–पालयिता, लुङ–अपीपलत्-त, कर्म० लट्–पाल्यते, क्त–पालित, क्त्वा–पालयित्वा ।

पि—६ प० (जाना, हिलाना), लट्–पियति, लुङ–अपैपीत् ।

पिञ्ज्—२ आ०, वर्णे सपर्चने (रँगना, छूना आदि), लट्–पिक्ते, लुङ–अपिञ्जिष्ट ।

पिञ्ज—१० उ०, १ प०, भाषायां दीप्तौ च (चमकना, जीवित रहना, देना, हिंसा करना), लट्–पिञ्जयति–ते, पिञ्जति, लिट्–पिञ्जयाचकार–चक्र, पिपिञ्ज, लुङ–अपिपिञ्जत्-त, अपिञ्जीत् ।

पिट्—१ प०, शब्दसंघातयो (शब्द करना, इकट्ठा करना), लट्–पेटति, लिट्–पिपेट, लुङ–अपेटीत् ।

पिट्—१ प०, हिंसासंक्लेशनयो (मारना, दुःख देना), लट्–पेटति ।

पिण्ड्—१ आ०, १० उ०, १ प०, संघाते (इकट्ठा करना, ढेर बनाना), लट्–पिण्डते, पिण्डयति-ते, पिण्डति, लिट्–पिपिण्डे, पिंडयाचकार-चक्रे, पिपिंड, लुङ–अपिण्डिष्ट, अपिपिडत्-त, अपिण्डीत् । क्त–पिण्डित ।

पिल्—१० उ० (फेंकना, उत्तेजित करना), लट्–पेलयति–ते, लिट्–पेलयाचकार-चक्रे, लुट्–पेलयिता ।

पिन्व्—१ प०, सेचने सेवने च (सींचना, सेवा करना), लट्–पिन्वति, लिट्–पिपिन्व, लुट्–पिन्विता, लृट्–पिन्विष्यति, लृङ–अपिन्विष्यत, लुङ–अपिन्वीत्, आ० लिङ–पिन्व्यात् । कर्म० लट्–पिन्व्यते ।

पिश्—६ प०, अवयवे दीपनायां च (रूप बनाना, जलाना), लट्–पिशति, लिट्–पिपेश, लुट्–पेशिता, लुङ–अपेशीत् । णिच्-लट्–पेशयति-ते, लुङ–अपीपिशत्–त । सन्–पिपिशियति, पिपेशियति, क्त–पिशित, क्त्वा–पिशित्वा ।

पिष्—७ प०, संचूर्णने (पीसना, दुःख देना), लट्–पिनष्टि, लिट्–पिपेश, लुट्–पेष्टा, लृट्–पेक्ष्यति, लृङ–अपेक्ष्यत्, लुङ–अपिषत्, आ० लिङ–पिष्यात्, कर्म० लट्–पिष्यते, लुङ–अपेषि, णिच्–लट्–पेषयति-ते, लुङ–अपीपिषत–त । सन्–पिपिक्षति, क्त–पिष्ट, क्त्वा–पिष्ट्वा, तुम्–पेष्टुम् ।

पिस्—१ प० (जाना), लट्–पेसति, लिट्–पिपेस, लुट्–पेसिता, लुङ–
अपेसीत् ।

पिस्—१० उ० (जाना), लट्–पेसयति-ते, लिट्–पेसयाचकार–चक्रे ।

पी—४ आ०, पाने (पीना), लट्–पीयते, लिट्–पिप्ये, लृट्–पेष्यते, लुङ–
अपेष्ट । णिच् लट्–पाययति-ते, लुङ–अपीपयत्–त, सन्–पिपीपते ।

पीड्—१० उ०, (पीडा देना, दु ख देना), लट्–पीडयति-ते, लिट्–पीड-
याचकार–चक्रे, लुट्–पीडयिता, लृट्–पीडयिष्यति-ते, लृङ–अपीडयिष्यत्–त,
लुङ–अपीपिडत्–त, अपिपीडत्–त । सन्–पिपीडयिषति-ते, क्त–पीडित ।

पीव्—१ प०, स्थौल्ये (मोटा या पुष्ट होना), लट्–पीवति, लृट्–पीवि-
ष्यति, लुङ–अपीवीत् ।

पुस्—१० उ०, अभिवर्धने (बढ़ना, दबाना), लट्–पुसयति-ते, लुङ–
अपुपुसत्–त ।

पुट्—६ उ०, सश्लेषणे (कुटादि) (चिपटना), लट्–पुटति, लिट्–पुपोट,
(म० पु० एक० पुपुटिथ) लृट्–पुटिष्यति, लुङ–अपुटीत् ।

पुट्—१० उ०, ससर्गे (जोडना), लट्–पुटयति–ते, लुट्–पुटयिता, लुङ–
अपुपुटत्–त ।

पुट्—१० उ०, भाषाया दीप्तौ च (बोलना, चमकना, चूर्ण करना), लट्–
पोटयति-ते, लिट्–पोटयाचकार-चक्रे, लृट्–पोटयिष्यति-ते, लुङ–अपुपुटत्–त ।

पुड्—१ प०, मर्दने (पीसना), लट्–पोडति, लिट्–पुपोड, लृट्–पोडि-
ष्यति, लुङ–अपोडीत् ।

पुड्—६ प०, उत्सर्गे (कुटादि), (छोडना, पता लगाना), लट्–पुडति,
लृट्–पुडिष्यति, लुङ–अपुडीत् । सन्–पुपुडिषति ।

पुण्—६ प०, शुभकर्मणि (शुभ कर्म करना), लट्–पुणति, लृट्–
पुणिष्यति, लुङ–अपोणीत् । सन्–पुपुणिषति, पुपोणिषति ।

पुष्—४ प०, हिसायाम् (हिसा करना, दु ख पहुंचाना), लट्–पुष्यति,
लिट्–पुपोथ, लुङ–अपोथीत् ।

पुष्—१० उ०, भाषाया दीप्तौ च (बोलना, चमकना), लट्–पोथयति-
ते, लुङ–अपुपुथत्–त ।

पुन्थ्—१ प०, हिसावलेशनयो (हिसा करना, क्लेश देना), लट्–पुन्थति,
लृट्–पुन्थिष्यति, लुङ–अपुन्थीत् ।

पुर्—६ प०, अग्रगमने (आगे चलना), लट्–पुरति, लिट्–पुपोर, लृट्–
पोरिष्यति, लुङ–अपोरीत् ।

पुर्व्—१ प०, पूरणे (पूरा करना), लट्–पूर्वति, लिट्–पुपूर्व, लृट्–पूर्वि-
ष्यति, लुङ–अपूर्वीत् । कर्म० लट्–पूर्व्यते, लुङ–अपूर्वि ।

पूर्व्—१० उ०, निकेतने (रहना), लट्–पूर्वयति-ते, लुट्–पूर्वयिता, लुङ–अपुपूर्वत्-त ।

पुल्—१ प०, ६ प०, महत्त्वे, १० उ०, सघाते च (लम्बा होना, बडा होना), लट्–पोलति, पुलति, पोलयति-ते, लुङ–अपोलीत्, अपूपुलत्-त ।

पुष—४ प०, पुष्टौ (पुष्ट करना, पालन करना, बढाना, दिखाना), लट्–पुष्यति, लिट्–पुपोष, लुट्–पोष्टा, लृट्–पोक्ष्यति, लृङ–अपोक्ष्यत्, लुङ–अपुषत्, आ० लिङ–पुष्यात् । सन्–पुपुक्षति, क्त–पुष्ट ।

पुष्—१ और ९ प०, (पालन करना, बढाना, पुष्ट करना), लट्–पोषति, पुष्णाति, लिट्–पुपोष, लुट्–पोषिता, लृट्–पोषिष्यति, लुङ–अपोषीत् । कर्म० लट्–पुष्यते, लुङ–अपोषि, णिच्–लट्–पोषयति-ते, लुङ–अपूपुषत्-त, क्त–पुषित (पोषित भी), क्त्वा–पुषित्वा, पोषित्वा ।

पुष्—१० उ०, धारणे (मानना, बढ़ाना, पुष्ट करना), लट्–पोषयति-ते, लिट्–पोषयाचकार-चक्रे, लुट्–पोषयिता, लुङ–अपूपुषत्-त । सन्–पुपोषयिषति-ते ।

पुष्प्—४ प०, विकसने (विकसित करना, विकसित होना), लट्–पुष्प्यति, लिट्–पुपुष्प, लुट्–पुष्पिता, लृट्–पुष्पिष्यति, लृङ–अपुष्पिष्यत्, लुङ–अपुष्पीत् । णिच्–लट्–पुष्पयति-ते, क्त–पुष्पित ।

पुस्त्—१० उ०, आदरानादरयो (आदर करना, अनादर करना, बाँधना), लट्–पुस्तयति-ते, लुङ–अपुपुस्तत्-त ।

पू—१ प०, पवने (पवित्र करना, हवा मे उडाकर अन्नादि साफ करना), लट्–पवते, लिट्–पुपुवे, लुट्–पविता, लुङ–अपविष्ट, आ० लिङ–पविषीष्ट । सन्–पिपविषते, णिच्–लट्–पावयति-ते, लुङ–अपीपवत्-त, यङन्त–पोपूयते, पोपवीति, पोपोति, क्त–पूत ।

पू—९ उ० (पवित्र करना आदि), लट्–पुनाति, पुनीते, लिट्–पुपाव, पुपुवे, लुट्–पविता, लृट्–पविष्यति-ते, लृङ–अपविष्यत्-त, लुङ–अपविष्ट, अपावीत्, आ० लिङ–पूयात्, पविषीष्ट सन्–पुपूषति-ते, क्त-पूत ।

पूज्—१० उ०, पूजायाम् (पूजा करना, सत्कार करना, उपहार देना), लट्–पूजयति-ते, लिट्–पूजयाचकार–चक्रे, लुट्–पूजयिता, लृट्–पूजयिष्यति–ते, लृङ–अपूजयिष्यत्–त, लुङ–अपूपुजत्–त । सन्–पुपूजयिषति–ते, क्त–पूजित, क्त्वा–पूजयित्वा, तुम्–पूजयितुम् ।

पूण्—१० उ० (ढेर लगाना), लट्–पूणयति-ते, लिट्–पूणयाचकार-चक्रे ।

पूय्—१ आ०, विशरणे दुर्गन्धे च (घृणा करना, दुर्गन्धित होना), लट्–पूयते, लिट्–पुपूये, लुट्–पूयिता, लुङ–अपूयिष्ट । णिच्–लट्–पूययति-ते, लुङ–अपूपुयत्-त, सन्–पुपूयिषते, क्त–पूत ।

पूर्—४ आ०, आप्यायने, (भरना, सन्तुष्ट करना), लट्–पूर्यते, लिट्–
पुपूरे, लुट्–पूरिता, लुङ–अपूरिष्ट, अपूरि । णिच्–लट्–पूरयति–ते, लुङ–अपू-
पुरत्–त । सन्–पुपूरिषते, क्त–पूर्त ।

पूर्—१० उ०, १ प० (भरना, ढकना), लट्–पूरयति–ते, पूरति, लिट्–
पूरयाचकार-चक्रे, पुपूर, लुट्–पूरयिता, पूरिता, लृट्–पूरयिष्यति–ते, लङ–
अपूरयिष्यत्–त, अपूरिष्यत्, लुङ–अपूपुरत्–त, लुङ–अपूरीत् । क्त–पूरित, कर्म०
लट्–पूर्यते ।

पूण्—१० उ०, सघाते (ढेर लगाना, इकट्ठा करना), लट्–पूर्णयति–ते,
लुङ–अपुपूर्णत्–त ।

पूल्—१ प०, १० उ० (इकट्ठा करना, सग्रह करना), लट्–पूलति,
पूलयति–ते, लुट्–पूलिता, पूलयिता, लुङ–अपूलीत्, अपूपुलत्–त ।

पूष्—१ प०, वृद्धौ (बढ़ना), लट्–पूषति, लिट्–पुपूष, लृट्–पूषिष्यति,
लुङ–अपूषीत् ।

पॄ—३ प०, पालनपूरणयो: (पूरा करना, पालन करना), लट्–पिपर्ति,
लङ–अपिप , लिट्–पपार, लृट्–परिष्यति, लुङ–अपारीत्, आ० लिङ–प्रियात्,
णिच्–लट्–पारयति–ते, लुङ–अपीपरत्–त । सन्–पुपूर्षति ।

पृ—६ आ०, व्यायामे व्यापारे च (प्राय आ+पृ) (लगा रहना, क्रिया-
शील होना), लट्–प्रियते, लिट्–पप्रे, लुट्–पर्ता, लृट्–परिष्यते, लृङ–अपरि-
ष्यत, आ० लिङ–पृषीष्ट, लुङ–अपृत, कर्म० लट्–प्रियते, णिच् लट्–पारयति-
ते, लुङ–अपीपरत्–त, सन्–पुपूर्षते, क्त–पृत, तुम्–पर्तुम् ।

पृच्—२ आ०, सपर्चने (सपर्क मे आना), लट्–पृक्ते, लिट्–पपृचे, लुट्–
पर्चिता, लुङ–अपर्चिष्ट । सन्–पिपर्चिषते, क्त–पृक्त ।

पृच्—७ प० (मिलना, जुडना), लट्–पृणक्ति, लिट्–पपर्च, लृट्–पर्चि-
ष्यति, लुङ–अपर्चीत् । सन्–पिपर्चिषति, क्त–पृक्त, क्त्वा–पर्चित्वा, तुम्–
पर्चितुम् ।

पृच्—१ प०, १० उ० (विघ्न डालना, मिलना), लट्–पर्चति, पर्चयति-
–ते, लुङ–अपर्चीत्, अपपर्चत्–त, अपीपृचत्–त । सन्–पिपर्चिषति, पिपर्चयिषति-
ते ।

पृञ्ज्—२ आ० (सपर्क मे आना), लट्–पृङ्क्ते, पपृञ्जे ।

पृड्—६ प०, सुखने (प्रसन्न होना, सुखी होना), लट्–पृडति, लृट्–पर्डि-
ष्यति, लुङ–अपर्डीत् ।

पृण्—६ प०, प्रीणने (प्रसन्न करना, सन्तुष्ट करना), लट्–पृणति, लुङ–
अपर्णीत् ।

पृथ्—१० उ०, प्रक्षेपे (फेंकना, भेजना), लट्–पर्थयति–ते, लृट्–पर्थ-
यिष्यति–ते, लुङ–अपपर्थत्–त, अपीपृथत्–त ।

पृषु—१ प०, सेचनहिंसाक्लेशनेपु (सींचना, मारना, क्लेश देना), लट्–पर्षति, लिट्–पपर्ष, लुङ्–अपर्षीत्, णिच् लट्–पर्षयति-ते, लुङ्–अपपर्षत्–त, अपीपृषत्–त । सन्–पिपर्षिषति, क्त–पर्षित, पृष्ट ।

पृ—३ प०, पालनपूरणयो. (भरना, पालन करना, पूरा करना), लट्–पिपर्ति, लिट्–पपार, लुट्–परिता, परीता, लृट्–परिष्यति, परीष्यति, लुङ्–अपारीत्, आ० लिङ्–पूर्यात् । सन्–पुपूर्षति, पिपरिषति, पिपरीषति, कर्म० लट्–पूर्यते, णिच्-लट्–पारयति–ते, लुङ्–अपीपरत्–त, क्त–पूर्ण, पूरित, क्त्वा, पूर्त्वा ।

पृ—६ प० (पूरा करना), लट्–पृणाति, लिट–पपार, (शेष पूर्ववत्), शतृ–पृणत् ।

पृ—१० उ०, १ प०, लट्–पारयति-ते, परति, लृट्–पारयिष्यति-ते, परिष्यति, परीष्यति, लुङ्–अपीपरत्-त, लुङ्–अपारीत् ।

पेल्—१ प०, १० उ० (जाना, हिलाना), लट्–पेलति, पेलयति-ते ।

पेव्—१ आ०, सेवने (सेवा करना), लट्–पेवते, लुङ्–अपेविष्ट ।

पेष्—१ आ०, सेवने निश्चये प्रयत्ने च (सेवा करना, निश्चय करना), लट्–पेषते, लुङ्–अपेषिष्ट ।

पेस्—१ प० (जाना), लट्–पेसति ।

पै—१ प०, (सूखना, मुरझाना), लट्–पायति, लुङ्–अपासीत् ।

पैण्—१ प०, गतिप्रेरणश्लेषणेषु (जाना, कहना, चिपकना), लट्–पैणति ।

प्याय्—१ आ०, वृद्धौ (बढना, सूजना), लट्–प्यायते, लिट्–पिप्ये, लुट्–प्यायिता, लृट्–प्यायिष्यते, लङ्–अप्यायिष्यत, लुङ्–अप्यायि, अप्यायिष्ट । सन्–पिप्यायिषते, क्त–प्यान, पीन ।

प्यै—१ आ०, वृद्धौ (बढना), लट्–प्यायते, लिट्–पप्ये, लुट्–प्याता, लृट्–प्यास्यते, लङ्–अप्यास्यत, लुङ्–अप्यास्त । क्त–पीन ।

प्रच्छ—१ प० ज्ञीप्सायाम् (पूछना), लट्–पृच्छति, लिट्–पप्रच्छ, लुट्–प्रष्टा, लृट्–प्रक्ष्यति, लङ्–अप्रक्ष्यत्, लुङ्–अप्राक्षीत् (द्वि० अप्राष्टाम्), आ० लिङ्–पृच्छ्यात् । सन्–पिपृच्छिषति-ते, कर्म० लट्–पृच्छ्यते, णिच्-लट्–प्रच्छयति-ते, क्त–पृष्ट, क्त्वा–पृष्ट्वा, तुम्–प्रष्टुम् ।

प्रथ्—१ आ०, प्रख्याते (प्रसिद्ध होना, बढना, उठना), लट्–प्रथते, लिट्–पप्रथे, लुट्–प्रथिता, लृट्–प्रथिष्यते, लङ्–अप्रथिष्यत, लुङ्–अप्रथिष्ट । णिच-लट्–प्रथयति-ते, लुङ्–अपप्रथत्–त । सन्–पिप्रथिषते, क्त–प्रथित ।

प्रथ्—१० उ०, (प्रसिद्ध होना), लट्–प्रथयति–ते, लिट्–प्रथयाचकार-चक्रे लट–प्रथयिता, लुङ्–अपप्रथत्–त । सन्–पिप्रथयिषति-ते ।

प्रा—१ प०, पूरणे (भरना), लट्-प्राति, लिट्-पप्रौ, लुट्-प्राता, लुङ्-अप्रासीत्, आ० लिङ्-प्रायात्, प्रेयात्, कर्म० प्रायते ।

प्री—४ आ०, प्रीतौ (प्रेम करना, प्रसन्न होना), लट्-प्रीयते, लिट्-पिप्रिये, लुट्-प्रेता, लुङ्-अप्रेष्ट, आ० लिङ्-प्रेषीष्ट, सन्-पिप्रीषते, क्त-प्रीत, क्त्वा-प्रीत्वा, तुम्-प्रेतुम् ।

प्री—९ उ०, तर्पणे (प्रसन्न करना, आनन्दित होना), लट्-प्रीणाति, प्रीणीते, लिट्-पिप्राय, पिप्रिये, लुट्-प्रेता, लृट्-प्रेष्यति-ते, लुङ्-अप्रैषीत्, अप्रेष्ट, आ० लिङ्-प्रीयात्, प्रेषीष्ट । सन्-पिप्रीषति-ते, क्त-प्रीत ।

प्री—१० उ० और १ उ०, तर्पणे (प्रसन्न करना), लट्-प्रीणयति-ते, प्रयति-ते, लृट्-प्रीणयिष्यति-ते, प्रेष्यति-ते, लुङ्-अपिप्रीणत्-त, अप्रैषीत्, अप्रेष्ट ।

प्रु—१ आ०, गतौ (जाना, कूदना), लट्-प्रवते, लिट्-पुप्रुवे, लुट्-प्रोता, लुङ्-अप्रोष्ट । कर्म० लट्-प्रूयते, णिच् लट्-प्रावयति-ते ।

प्रुट्—१ प०, मर्दने (रगडना), लट्-प्रोटति, लिट्-पुप्रोट, लुङ्-अप्रोटीत् ।

प्रुष्—१ प०, दाहे (जलाना), लट्-प्रोषति, लिट्-पुप्रोष, लृट्-प्रोषिष्यति, लुङ्-अप्रोषीत् । सन्-पुप्रुषिषति, पुप्रोषिषति, क्त-प्रुष्ट, क्त्वा-प्रुष्ट्वा, प्रोषित्वा, प्रुषित्वा ।

प्रुष्—९ प०, स्नेहनसेवनपूरणेषु (गीला होना, सींचना, भरना), लट्-प्रुष्णाति । क्त-प्रुषित, क्त्वा-प्रोषित्वा ।

प्रेङ्खोल्—१० उ०, आन्दोलने (हिलना, हिलाना), लट्-प्रेङ्खोलयति-ते, लुङ्-अपिप्रेङ्खोलत्-त । कर्म० लट्-प्रेङ्खोल्यते ।

प्रेष्—१ आ० (जाना), लट्-प्रेषते, लुङ्-अप्रेषिष्ट ।

प्रोथ्—१ उ०, पर्याप्तौ (पूरा होना, बराबर होना), लट्-प्रोथति-ते, लुङ्-अप्रोथीत्, अप्रोथिष्ट ।

प्लक्ष्—१ उ०, अदने (खाना), लट्-प्लक्षति-ते, लुङ्-अप्लक्षीत्, अप्लक्षिष्ट ।

प्लिह्—१ प० (जाना), लट्-प्लेहति-ते, लुङ्-अप्लेहिष्ट ।

प्ली—९ प० (जाना), प्लीनाति, लृट्-प्लेष्यति, लुङ्-अप्लैषीत् ।

प्लु—१ आ०, गतौ (तैरना, उडना, कूदना), लट्-प्लवते, लिट्-पुप्लुवे, लुट्-प्लोता, लृट्-प्लोष्यते, लृङ्-अप्लोष्यत, लुङ्-अप्लोष्ट । णिच्-लट्-प्लावयति-ते, लुङ्-अपुप्लवत्-त, अपिप्लवत्-त, क्त-प्लुत ।

प्लुष्—१ और ४ प०, दाहे (जलाना), लट्-प्लोषति, प्लुष्यति, लिट्-पुप्लोष, लुट्-प्लोषिता, लृट्-प्लोषिष्यति, लृङ्-अप्लोषिष्यत्, लुङ्-अप्लोषीत् (१), अप्लुषत् (४), क्त-प्लुष्ट (१), प्लुषित (४), क्त्वा-प्लुष्ट्वा (१) प्लुषित्वा, प्लोषित्वा (१,४) ।

प्लुष्—९ प०, स्नेहनसेवनपूरणेषु (सींचना, भरना, गीला होना) लट्–प्लुष्णाति, लुङ्–अप्लोषीत् । (शेष रूप प्लुष् ४ के तुल्य) ।

प्सा—२ प०, भक्षणे (खाना, निगलना), लट्–प्साति, लिट्–पप्सौ, लुट्–प्साता, लृट्–प्यास्यति, लृङ्–अप्सास्यत्, लुङ्–अप्सासीत्, आ० लिङ्–प्सायात्, प्सेयात् । सन्–पिप्सासति, कर्म० लट्–प्सायते, णिच्–लट्–प्सापयति, लुङ्–अपिप्सत्, क्त–प्सात ।

फ

फक्क्—१ प०, नीचैर्गतौ (दुर्व्यवहार करना, धीरे से जाना), लट्–फक्कति, लिट्–पफक्क, लुङ्–अफक्कीत्, क्त–फक्कित ।

फण्—१ प०, गतिदीप्त्योः (जाना, सरलता से उत्पन्न करना), लट्–फणति, लिट्–पफाण, लुट्–फणिता, लुङ्–अफणीत्, अफाणीत्, आ० लिङ्–फण्यात् । सन्–पिफणिषति, णिच्–लट्–फणयति-ते, लुङ्–अपीफणत्-त, क्त–फणित ।

फल्—१ प०, विशरणे (फटना, खोलना, फाड़ना) लट्–फलति, लिट्–पफाल, लुट्–फलिता, लृट्–फलिष्यति, लृङ्–अफलिष्यत्, लुङ्–अफालीत् । सन्–पिफलिषति, क्त–फुल्ल (प्रफुल्ल) ।

फल्—१ प०, निष्पत्तौ (जाना, परिणाम होना, सफल होना), लट्–फलति । क्त–फलित । (शेष रूप पूर्ववत्) ।

फुल्ल्—१ प०, विकसने (खोलना, पुष्प आदि का विकसित होना), लट्–फुल्लति, लिट्–पुफुल्ल, लुट्–फुल्लिता, लृट्–फुल्लिष्यति, लृङ्–अफुल्लिष्यत्, लुङ्–अफुल्लीत् । सन्–पुफुल्लिषति, क्त–फुल्लित ।

फेल्—१ प०, (जाना), लट्–फेलति, लृट्–फेलिष्यति, लृङ्–अफेलीत् ।

ब

बंह्—१ आ०, वृद्धौ (बढ़ना), लट्–बहंते, लृट्–बंहिष्यते, लुङ्–अबंहिष्ट । क्त–बंहित ।

बठ्—१ प०, (बढ़ना), लट्–बठति ।

बण्—१ प०, शब्दे (शब्द करना), लट्–बणति, लिट्–बबाण, लुङ्–अबणीत्, अबाणीत् ।

बद्—१ प० (स्थिर होना), लट्–बदति, लिट्–बबाद, लुङ्–अबदीत्–अबादीत् ।

बध्—१ आ०, चित्तविकारे (घृणा करना, डरना), लट्–बीभत्सते, लिट्–बीभत्सांचक्रे, लुट्–बीभत्सिता, लृट्–बीभत्सिष्यते, लृङ्–अबीभत्सिष्यत्, आ० लिङ्–बीभत्सिषीष्ट, लुङ्–अबीभत्सिष्ट । सन्–बीभत्सिषते, कर्म० लट्–बीभत्स्यते, लुङ्–अबीभत्सि, क्त–बीभत्सित ।

बध्—१० उ०, संयमने (बाँधना), लट्–बाधयति, बाधयते, लुङ्–अबीबधत्–त, आ० लिङ्–बाध्यात्, बाधयिषीष्ट । सन्–बिबाधयिषति–ते ।

बन्ध्—६ प०, बन्धने (बाँधना, आकृष्ट करना, बनाना), लट्–बध्नाति, लिट्–बबन्ध, लुट्–बन्द्धा, लृट्–भन्त्स्यति, लृङ्–अभन्त्स्यत्, लुङ्–अभान्त्सीत्, आ० लिङ्–बध्यात् । सन्–बिभन्त्सति, कर्म० लट्–बध्यते, णिच् लट्–बन्धयति–ते, लुङ्–अबबन्धत्–त, क्त–बद्ध, क्त्वा–बद्ध्वा ।

बन्ध्—१० उ० (बाँधना), लट्–बन्धयति–ते, लिट्–बन्धयाञ्चकार–चक्रे, लुङ्–अबबन्धत्–त, सन्–बिबन्धयिषति–ते । कर्म०लट्–बन्ध्यते ।

बर्ब्—१ प०, (जाना), लट्–बर्बति, लिट्–बबर्ब, लुट्–बर्बिता ।

बह्—१ आ०, परिभाषणहिंसाप्रदानेषु (कहना, देना, हिंसा करना), लट्–बहते, लिट्–बबहे, लुङ्–अबहिष्ट ।

बर्ह्—१० उ०, हिंसायां भाषायां दीप्तौ च (मारना, बोलना), लट्–बर्हयति–ते, लुङ्–अबबर्हत्–त ।

बल्—१ प०, प्राणने धान्यावरोधने च (जीवित रहना, अन्न-संग्रह करना), लट्–बलति, लिट्–बबाल, लुट्–बलिता, लुङ्–अबालीत् ।

बल्—१० उ०, प्राणने (साँस लेना), लट्–बलयति ते ।

बस्—४ प०, स्तम्भे (रुकना), लट्–बस्यति, लिट्–बबास, लुट्–बसिता, लुङ्–अबसत् ।

बाड्—१ आ०, आप्लाव्ये (नहाना, डुबकी लगाना), लट्–बाडते, लिट्–बबाडे, लुङ्–अबाडिष्ट ।

बाध्—१ आ०, लोडने (तंग करना, दुःख देना), लट्–बाधते, लिट्–बबाधे, लुट्–बाधिता, लृट्–बाधिष्यते, लृङ्–अबाधिष्यत, लुङ्–अबाधिष्ट । णिच्–लट्–बाधयति–ते, लुङ्–अबबाधत्–त, कर्म०–लट्–बाध्यते, लुङ्–अबाधि, क्त–बाधित, क्त्वा–बाधित्वा, तुम्–बाधितुम् ।

बिट्—१ प०, आक्रोशे (शाप देना, चिल्लाना), लट्–बेटति, लिट्–बिबेट, लुट्–बेटिता, लुङ्–अबेटीत् ।

बिन्द्—१ प०, अवयवे (काटना, पृथक् करना), लट्–बिन्दति, लिट्–बिबिन्द, लुट्–बिन्दिता ।

बिल्—६ प०, भेदने (तोडना), लट्–बिलति, लिट्–बिबेल, लुट्–बेलिता, लुङ्–अबेलीत्, (१० उ०), लट्–बेलयति–ते ।

बिस्—४ प०, क्षेपे प्रेरणे च (फेंकना, जाना, प्रेरणा देना), लट्–बिस्यति, लिट्–बिबेस, लृट्–बेसिष्यति, लुङ्–अबिसत् ।

बुक्क्—१ प०, १० उ०, भाषणे (भोकना, कहना), लट्–बुक्कति, बुक्कयति–ते, लुङ्–अबुक्कीत् अबुबुक्कत्–त ।

बुध्—१ उ०, बोधने (जानना, देखना, आदर करना), लट्–बोधति-ते, लिट्–बुबोध, बबुधे, लुट्–बोधिता, लृट्–बोधिष्यति-ते, लङ्–अबोधिष्यत्–न, लुङ्–अबुधत्, अबोधीत्, अबोधिष्ट । णिच्–लट्–बोधयति-ते, लुङ्–अबूबुधत्-त । सन्–बुबुधिषति-ते, बुबोधिषति-ते, कर्म० लट्–बुध्यते, लुङ्–अबोधि, क्त–बुधित, क्त्वा–बुधित्वा, बोधित्वा ।

बुध्—४ आ० (जानना, समझना), लट्–बुध्यते, लिट्–बुबुधे, लुट्–बोद्धा, लृट्–भोत्स्यते, लङ्–अभोत्स्यत, लुङ्–अबुद्ध, अबोधि, आ० लिङ्–भुत्सीष्ट। सन्–बुभुत्सते, कर्म०–लट्–बुध्यते, णिच्–लट्–बोधयति-ते, क्त–बुद्ध, क्त्वा–बुध्द्वा, तुम्–बोद्धम् ।

बुल्—१० उ० (डूबना), लट्–बोलयति-ते, लिट्–बोलयाचकार-चक्रे, लुट्–बोलयिता ।

बुस्—४ प० (उगलना), लट्–बुस्यति, लिट्–बुबोस ।

बुस्त्—१० उ० (आदर करना, आदरयुक्त व्यवहार करना), लट्–बुस्तयति-ते, लिट्–बुस्तयाचकार-चक्रे, लुट्–बुस्तयिता ।

बृह्—१ प०, वृद्धौ (बढना), लट्–बर्हति, लिट्–बबर्ह, लुट्–बर्हिता, लृट्–बर्हिष्यति, लङ्–अबर्हिष्यत्, लुङ्–अबर्हीत् ।

बृह्—६ प०, उद्यमने (काम करना), लट्–बृहति, लिट्–बबर्ह (म० पु० एक० बर्बहिथ, बबर्ढ), लृट्–बर्हिष्यति, भर्क्ष्यति, लुङ्–अबर्हीत्, अभृक्षत् । णिच्–लट्–बर्हयति-ते, लुङ्–अबबर्हत्-त, अबीबृहत्-त, सन्–बिबर्हिषति, बिभृक्षति, क्त–बृढ, क्त्वा–बर्हित्वा, बृढ्वा ।

बृंह्—१ प०, वृद्धौ शब्दे च (बढना, गरजना), लट्–बृंहति, लिट्–बबृंह, लृट्–बृंहिष्यति, लुङ्–अबृंहीत् ।

बेह्—१ आ०, प्रयत्ने (प्रयत्न करना), लट्–बेहते, लुङ्–अबेहिष्ट ।

ब्रू—२ उ०, व्यक्तायां वाचि (कहना), लट्–ब्रवीति, ब्रूते-आह, लिट्–उवाच, ऊचे, लुट्–वक्ता, लृट्–वक्ष्यति-ते, लङ्–अवक्ष्यत्-त, लुङ्–अवोचत्-त, आ० लिङ्–उच्यात्, वक्षीष्ट । कर्म० लट्–उच्यते, णिच्–लट्–वाचयति-ते, लुङ्–अवीवचत्–त, क्त–उक्त, क्त्वा–उक्त्वा, तुम्–वक्तुम् ।

ब्रूस्—हिंसायाम् (हिंसा करना, चोट पहुँचाना), लट्–ब्रूसयति-ते, लिट्–ब्रूसयाचकार-चक्रे, लुट्–ब्रूसयिता, लुङ्–अबुब्रूसत्-त ।

भ

भक्ष्—१ उ०, भ्रक्ष् धातु के तुल्य ।

भक्ष्—१० उ०, अदने (खाना, दाँत से काटना, उपयोग करना), लट्–भक्षयति-ते, लिट्–भक्षयाचकार-चक्रे-आस-बभूव, लुट्–भक्षयिता, लृट्–भक्षयिष्यति-ते, लुङ्–अबभक्षत्-त, आ० लिङ्–भक्ष्यात्, भक्षयिषीष्ट । सन्–

बिभक्षयिषति-ते, कर्म० लट्–भक्ष्यते, क्त–भक्षित, क्त्वा–भक्षित्वा, तुम्–भक्षितुम् ।

भज्—१ उ०, सेवायाम् (सेवा करना, प्राप्त करना, छाँटना, आदर करना), लट्–भजति-ते, लिट्–बभाज, भेजे, लुट्–भक्ता, लृट्–भक्ष्यति-ते, लृङ्–अभक्ष्यत्-त, लुङ्–अभाक्षीत्, अभक्त, आ० लिङ्–भज्यात्–भक्षीष्ट । सन्–बिभक्षति-ते, कर्म० लट्–भज्यते, लुङ्–अभाजि, णिच्–लट्–भाजयति-ते, लुङ्–अबीभजत्–त, क्त–भक्त, क्त्वा–भक्त्वा, तुम्–भक्तुम् ।

भज्—१० उ०, विश्राणने (पकाना, देना), लट्–भाजयति-ते, लिट्–भाजयाचकार-चक्रे, लुट्–भाजयिता, लुङ्–अबीभजत्-त । सन्–बिभाजयिषति-ते ।

भञ्ज्—१० उ०, भाषायां दीप्तौ च (कहना, चमकना), लट्–भञ्जयति-ते, लुङ्–अबभञ्जत्-त ।

भञ्ज्—७ प०, आमर्दने (तोडना, निराश करना), लट्–भनक्ति, लिट्–बभञ्ज, लुट्–भङ्क्ता, लृट्–भङ्क्ष्यति, लृङ्–अभङ्क्ष्यत्, लुङ्–अभाङ्क्षीत्, आ० लिङ्–भज्यात्, सन्–बिभङ्क्षति, कर्म० लट्–भज्यते, लुङ्–अभञ्जि, अभाजि, णिच्–लट्–भञ्जयति-ते, लुङ्–अबभञ्जत्-त, क्त–भग्न, क्त्वा–भक्त्वा, भङ्क्त्वा, तुम्–भङ्क्तुम् ।

भट्—१ प०, भृतौ (वेतन पाना, पालन करना), लट्–भटति, लिट्–बभाट, लुट्–भटिता, लुङ्–अभटीत्, अभाटीत् ।

भण्ड्—१ आ०, परिभाषणे (परिहास करना), लट्–भण्डते, लिट्–बभण्डे, लुट्–भण्डिता, लुङ्–अभण्डिष्ट ।

भण्ड्—१० उ०, कल्याणे सुखे प्रतारणे च (भाग्यशाली बनाना, धोखा देना), लट्–भण्डयति-ते, लिट्–भण्डयाचकार-चक्रे, लुट्–भण्डयिता, लुङ्–अबभण्डत्–त, (१ प० भी है), लट्–भण्डति, लुङ्–अभण्डीत् ।

भण्—१ प०, शब्दे (कहना, पुकारना), लट्–भणति, लिट्–बभाण, लुट्–भणिता, लृट्–भणिष्यति, लुङ्–अभणीत्, अभाणीत् । सन्–बिभणिषति, कर्म० लट्–भण्यते, लुङ्–अभाणि, क्त–भणित, क्त्वा–भणित्वा ।

भर्त्स्—१० आ०, (कभी पर० भी है) (डराना, धमकाना, गाली देना), लट्–भर्त्सयते, लिट्–भर्त्सयाचक्रे, लुट्–भर्त्सयिता, लुङ्–अबभर्त्सत । सन्–बिभर्त्सयिषते ।

भल्—१ आ०, परिभाषणहिंसादानेषु (कहना, मारना, देना), लट्–भलते, लुङ्–अभलिष्ट ।

भल्—१० आ०, आभण्डने (देखना), लट्–भालयते, लिट्–भालयाचक्रे, लुट्–भालयिता, लुङ्–अबीभलत् ।

भल्ल्—१ आ०, परिभाषणहिंसादानेषु (वर्णन करना, चोट मारना, देना), लट्–भल्लते, लिट्–बभल्ले, लुट्–भल्लिता, लुङ–अभल्लिष्ट, क्त–भल्लित ।

भष्—१ प०, (भोंकना), लट्–भषति, लिट्–बभाष, लुट्–भषिता, लुङ–अभषीत् । सन्–बिभषिषति ।

भस्—३ प०, भर्त्सनदीप्त्योः (धमकाना, दोष लगाना, चमकना), लट्–बभस्ति, लिट्–बभास (केवल वेदों में प्रयुक्त होती है) ।

भा–२ प०, दीप्तौ (चमकना, प्रकट होना, होना), लट्–भाति, लुङ–प्र० पु० बहु० अभान्–अभुः, लिट्–बभौ, लुट्–भाता, लुङ–अभासीत् । कर्म० । लट्–भायते, लुङ–अभायि, णिच्–लट्–भापयति-ते, लुङ–अबीभपत्-त ।

भाज्—१० उ०, पृथक्करणे (विभाजित करना), लट्–भाजयति-ते, लिट्–भाजयाचकार-चक्रे, लुट्–भाजयिता, लुङ–अबभाजत्-त । सन्–बिभाजयिषति-ते, क्त–भाजित ।

भाम्—१ आ०, क्रोधे (क्रोध करना), लट्–भामते, लिट्–बभामे, लृट्–भामिष्यते, लुङ–अभामिष्ट ।

भाष्—१ आ० (कहना, पुकारना), लट्–भाषते, लिट्–बभाषे, लुट्–भाषिता, लुङ–अभाषिष्ट । (१० उ० भी है), लुङ–अबभाषत्-त ।

भिक्ष्—१ आ०, भिक्षायां लाभेऽलाभे च (माँगना, पाना), लट्–भिक्षते, लिट्–बिभिक्षे, लुट्–भिक्षिता, लृट्–भिक्षिष्यते, लुङ–अभिक्षिष्ट । णिच्–लट्–भिक्षयति-ते, लुङ–अबिभिक्षत्-त ।

भिद्—७ उ०, विदारणे (तोड़ना, फोड़ना), लट्–भिनत्ति, भिन्ते, लिट्–बिभेद, बिभिदे, लुट्–भेत्ता, लृट्–भेत्स्यति-ते, लृङ–अभेत्स्यत्-त, लुङ–अभिदत्, अभैत्सीत्, (द्वि० अभैत्ताम्), अभित्त, णिच्–लुङ–अबीभिदत्-त, सन्–बिभित्सति, यङन्त–बेभिद्यते, बेभिदीति, बेभेत्ति, कर्म० लुङ–अभेदि, क्त–भिन्न (भित्त भी होता है) ।

भिन्द्—१ प० (विभाजित करना, काटना), लट्–भिन्दति, लिट्–बिभिन्दे, लुङ–अभिन्दीत्, कर्म० लट्–भिन्द्यते ।

भी—३ प०, भये (डरना, चिन्तित होना), लट्–बिभेति, लिट्–बिभाय, बिभयाचकार, लुट्–भेता, लृट्–भेष्यति, लृङ–अभेष्यत्, लुङ–अभैषीत्, आ० लिङ–भीयात् । सन्–बिभीषति, कर्म० लट्–भीयते, लुङ–अभायि, णिच्–लट्–भाययति, भापयते, भीषयते, लुङ–अबीभयत्–अबीभपत–अबीभिषत, यङन्त–बेभीयते, बेभयीति, बेभेति, क्त–भीत ।

भुज्—६ प०, कौटिल्ये (मोड़ना, टेढ़ा करना), लट्–भुजति, लिट्–बुभोज, लुट्–भोक्ता, लुङ–अभौक्षीत्, क्त–भुग्न ।

भुज्—७ उ०, पालनाभ्यवहारयोः (रक्षा करना अर्थ में आत्मने० है), (खाना, उपभोग करना, अर्थ में पर० है), लट्–भुनक्ति, भुङ्क्ते, लिट्–बुभोज,

बुभुजे, लुट्-भोक्ता, लृट्-भोक्ष्यति-ते, लृङ्-अभोक्ष्यत्-त, लुङ्-अभौक्षीत्,
अभुक्त, आ० लिङ्-भुज्यात्, भुक्षीष्ट । सन्-बुभुक्षति, कर्म० लट्-भुज्यते,
लुङ्-अभोजि, णिच्-लट्-भोजयति-ते, लुङ्-अबूभुजत्-त, यङन्त-बोभुज्यते,
बोभुजीति, बोभोक्ति, क्त-भुक्त ।

भू—१ प०, सत्तायाम् (कभी कभी आत्मने० भी है), (होना, जीवित
रहना, उत्पन्न होना), लट्-भवति-ते, लिट्-बभूव, बभूवे, लुट्-भविता, लृट्-भवि-
ष्यति-ते, लृङ्-अभविष्यत्-त, लुङ्-अभूत्-अभविष्ट, आ० लिङ्-भूयात्, भवि-
षीष्ट । णिच्-लट्-बुभूषति-ते, कर्म० लट्-भूयते, लुट्-भाविता, भविता, लृट्-
भविष्यते, भाविष्यते, लुङ्-अभावि, आ० लिङ्-भाविषीष्ट, भविषीष्ट, णिच्-
लट्-भावयति-ते, लुङ्-अबीभवत्-त, यङन्त-बोभूयते, बोभोति, बोभवीति,
क्त-भूत ।

भू—१० आ०, प्राप्तौ (पाना), लट्-भावयते, लिट्-भावयाचक्रे, लुट्-
भावयिता, लुङ्-अबीभवत, आ० लिङ्-भावयिषीष्ट । कर्म०-भाव्यते ।

भू—१० उ०, अवकल्कने (पवित्र होना, समझना, मिलना), लट्-
भावयति-ते, लिट्-भावयाचकार-चक्रे, लुट्-भावयिता, लुङ्-अबीभवत्-त,
आ० लिङ्-भाव्यात्, भावयिषीष्ट ।

भूष्—१ प०, अलङ्कारे (सजाना), लट्-भूषति, लिट्-बुभूष, लुट्-
भूषिता, लुङ्-अभूषीत् । सन्-बुभूषिषति ।

भूष्—१० उ० (सजाना), लट्-भूषयति-ते, लिट्-भूषयाञ्चकार-चक्रे,
लुट्-भूषयिता, लुङ्-अबुभूषत्-त, आ० लिङ्-भूष्यात्, भूषयिषीष्ट । सन्-
बुभूषयिषति-ते, कर्म०-भूष्यते, लुङ्-अभूषि, क्त-भूषित ।

भृ—१ उ०, भरणे (पालन-पोषण करना, भरना), लट्-भरति-ते, लिट्-
बभार, बभ्रे, लुट्-भर्ता, लृट्-भरिष्यति-ते, लुङ्-अभार्षीत्, अभृत, आ० लिङ्-
भ्रियात्-भृषीष्ट । सन्-बुभूर्षति-ते, बिभरिषति-ते, यङन्त-बेभ्रीयते, बर्भर्ति,
बर्भरीति, कर्म० भ्रियते, क्त-भृत ।

भृ—३ उ०, धारणपोषणयो: (पालन-पोषण करना, धारण करना),
लट्-बिभर्ति-बिभृते, लिट्-बभार-बभ्रे-बिभराञ्चकार-चक्रे, लुट्-भर्ता,
लृट्-भरिष्यति-ते, लुङ्-अभार्षीत्-अभृत । सन्-बिभरिषति, बुभूर्षति, कर्म०
लट्-भ्रियते, लुङ्-अभारि, णिच्-लट्-भारयति-ते, लुङ्-अबीभरत्-त ।

भृज्—१ आ०, भर्जने (भूनना), लट्-भर्जते, लिट्-बभर्जे, लुट्-भर्जिता,
लुङ्-अभर्जिष्ट, आ० लिङ्-भर्जिषीष्ट । णिच्-भर्जयति-ते, लुङ्-अबभर्जत्-त,
सन्-बिभर्जिषते, कर्म० लट्-भृज्यते, लुङ्-अभर्जि, क्त-भृक्त, क्त्वा-भर्जित्वा ।

भृश्—४ प०, अध:पतने (गिरना), लट्-भृश्यति, लिट्-बभर्श, लुट्-
भर्शिता, लुङ्-अभृशत् । क्त-भृष्ट, क्त्वा-भृष्ट्वा, भर्शित्वा ।

भृ—९ प० (भूनना, निन्दा करना, पालन करना), लट्-भृणाति, लिट्-
बभार, लुट्-भरिता, भरीता, लुङ्-अभारीत् । क्त-भूर्ण ।

भेष्—१ उ०, भये गतौ च (डरना, जाना), लट्–भेषति-ते, लृट्–भेषिष्यति-ते, लुङ्–अभेषीत्–अभेषिष्ट, आ० लिङ्–भेष्यात्, भेषिषीष्ट ।

भ्रंश्—१ आ०, अवस्रंसने, ४ प०, अध:पतने (गिरना, ढलना, बचना), लट्–भ्रंशते, भ्रश्यति, लिट्–बभ्रंशे, बभ्रंश, लुट्–भ्रंशिता, लृट्–भ्रंशिष्यति-ते, लुङ्–अभ्रशत्, अभ्रंशिष्ट, अभ्रंशत् । णिच्–भ्रंशयति-ते, लुङ्–अबभ्रंशत्–त, सन्–बिभ्रंशिषति-ते, यङन्त–बाभ्रश्यते, बाभ्रंशीति, बाभ्रंष्टि, क्त–भ्रष्ट, क्त्वा–भ्रंशित्वा, भ्रष्ट्वा ।

भ्रंस्—१ आ०, ४ प० (गिरना), लट्–भ्रंसते, भ्रस्यति । (शेष भ्रंश् की तरह रूप चलेंगे, श् को स् में बदल दें) ।

भ्रक्ष्—१ उ०, अदने (खाना), लट्–भ्रक्षति-ते, लिट्–बभ्रक्ष–क्षे, लुट्–भ्रक्षिता, लुङ्–अभ्रक्षीत्, अभ्रक्षिष्ट, आ० लिङ्–भ्रक्ष्यात्, भ्रक्षिषीष्ट ।

भ्रण्—१ प०, शब्दे (शब्द करना), लट्–भ्रणति, लिट्–बभ्राण, लुट्–भ्रणिता, लुङ्–अभ्रणीत्, अभ्राणीत् ।

भ्रम्—१ प०, चलने, ४ प० अनवस्थाने (घूमना, इधर-उधर फिरना), लट्–भ्रमति, भ्रम्यति, भ्राम्यति, लिट्–बभ्राम (म० पु० एक० बभ्रमिथ, भ्रेमिथ), लुट्–भ्रमिता, लृट्–भ्रमिष्यति, लुङ्–(१ प०) अभ्रमीत्, (४ प०) अभ्रमत् । णिच्–लट्–भ्रमयति, लुङ्–अबिभ्रमत्, सन्–बिभ्रमिषति, यङन्त–बम्भ्रम्यते, बम्भ्रमीति, बम्भ्रन्ति, कर्म० लट्–भ्रम्यते, लुङ्–अभ्रमि, क्त–भ्रान्त, क्त्वा–भ्रमित्वा, भ्रान्त्वा ।

भ्रश्—१ आ०, अवस्रंसने (गिरना), लट्–भ्रशते, लिट्–बभ्रशे, लृट्–भ्रशिष्यते, लुङ्–अभ्रशत्–अभ्रशिष्ट ।

भ्रस्ज्—६ उ०, पाके (भूनना), लट्–भृज्जति-ते, लिट्–बभ्रज्ज, बभर्ज, बभ्रज्जे, बभर्जे, लुट्–भ्रष्टा, भर्ष्टा, लृट्–भ्रक्ष्यति-ते, भर्क्ष्यति-ते, लुङ्–अभ्राक्षीत्–अभार्क्षीत्–अभ्रष्ट, अभर्ष्ट, आ० लिङ्–भृज्यात्, भ्रक्षीष्ट, भर्क्षीष्ट । सन्–बिभ्रक्षति-ते, बिभर्क्षति-ते, बिभ्रज्जिषति-ते, बिभर्जिषति-ते, कर्म० लट्–भृज्यते, लुङ्–अभर्जि, अभ्रज्जि, णिच्–लट्–भ्रज्जयति-ते, भर्जयति-ते, लुङ्–अबभ्रज्जत्–त, अबभर्जत्–त, क्त–भृष्ट, तुम्–भ्रष्टुम्, भर्ष्टुम् ।

भ्राज्—१ आ०, दीप्तौ (चमकना), लट्–भ्राजते, लिट्–बभ्राजे, भ्रेजे, लुट्–भ्राजिता, लृट्–भ्राजिष्यते, लुङ्–अभ्राजिष्ट, आ० लिङ्–भ्राजिषीष्ट, णिच्–लट् भ्राजयति-ते, लुङ्–अबिभ्रजत्–त, अबभ्राजत्–त, सन्–बिभ्राजिषते, कर्म० लट्–भ्राज्यते, लुङ्–अभ्राजि, क्त–भ्राजित ।

भ्राश्—(भ्लाश्)–१ आ०, ४ आ०, दीप्तौ (चमकना), लट्–भ्राशते, भ्राश्यते, लिट्–बभ्राशे, भ्रेशे, लुट्–भ्राशिता, लुङ्–अभ्राशिष्ट, आ० लिङ्–भ्राशिषीष्ट । णिच्–भ्राशयति-ते, लुङ्–अबभ्राशत्–त । सन्–बिभ्राशिषते, क्त–भ्राशित, तुम्–भ्राशितुम् ।

भ्रास्—पूर्ववत् ।

भ्री—६ प०, भये भरण इत्येके (डरना, रक्षा करना), लट्-भ्रिणाति, भ्रीणाति, लिट्-बिभ्राय, लृट्-भ्रेष्यति, लुङ्-अभ्रैषीत् ।

भ्रुड्—६ प०, आच्छादने सचयेच (ढकना, इकट्ठा करना), लट्-भ्रुडति, लिट्-बुभ्रोड, बुभ्रुडिय (कुटादि के तुल्य), लुट्-भ्रुडिता, लुङ्-अभ्रुडीत् ।

भ्रूण्—१० आ०, आशाविशङ्कयोः (चाहना, विश्वास करना), लट्-भ्रूणयते, लिट्-भ्रूणयाञ्चक्रे, लुट्-भ्रूणयिता, लुङ्-अबुभ्रूणत्, आ० लिङ्-भ्रूणयिषीष्ट । सन्-बुभ्रूणयिषते ।

भ्रेज्—१ आ०, दीप्तौ (चमकना), लट्-भ्रेजते, लिट्-बिभ्रेजे, लृट्-भ्रेजिष्यते, लुङ्-अभ्रेजिष्ट ।

भ्रेष्—१ उ०, भये गतौ च (जाना, डरना), लट्-भ्रेषति-ते, लिट्-बिभ्रेष, बिभ्रेषे, लुङ्-अभ्रेषिष्ट ।

म्लक्ष्—१ उ० (खाना), लट्-म्लक्षति-ते, लिट्-बम्लक्ष, बम्लक्षे, लुङ्-अम्लक्षीत्, अम्लक्षिष्ट ।

म्लाश् —	देखो —	भ्राश्	केवल	ल को र कर दें ।	
म्लास् —	देखो —	भ्रास्	"	"	"
म्लेष् —	देखो —	भ्रेष्	"	"	"

म

मंह्—१ आ०, वृद्धौ (बढ़ना), १ प०, भाषायां दीप्तौ च (कहना, चमकना), लट्-महते-ति, लिट्-ममंहे-ह, लुट्-मंहिता, लुङ्-अमंहिष्ट, अमंहीत्, आ० लिङ्-मंहिषीष्ट, मह्यात्, कर्म० मह्यते, सन्-मिमंहिषते-ति, क्त-मंहित ।

मंह्—१० उ० (कहना, चमकना), लृट्-मंहयिष्यति-ते, लुङ्-अममंहत्-त ।

मक्क्—१ आ० (जाना, हिलना), लट्-मक्कते, लिट्-ममक्के, लुङ्-अमक्किष्ट ।

मक्ष्—१ प०, संघाते (इकट्ठा करना, क्रुद्ध होना), लट्-मक्षति, लिट्-ममक्ष, लुङ्-अमक्षीत् ।

मख्—१ प०, गतौ (जाना, रेंगना), लट्-मखति, लिट्-ममाख, लुट्-मखिता, लुङ्-अमखीत्, अमाखीत् ।

मङ्क्—१ आ०, मण्डने (सजाना), लट्-मङ्कते, लिट्-ममङ्के, लुट्-मङ्किता, लुङ्-अमङ्किष्ट ।

मङ्ख्—१ प०, गतौ (जाना), लट्-मङ्खति, लिट्-ममङ्ख, लुङ्-अमङ्खीत्, कर्म० मङ्ख्यते, लुङ्-अमङ्खि ।

मङ्ग्—१ प० (जाना, हिलना), पूर्ववत् ।

मथ्—१ प०, मण्डने (सजाना), लट्–मथति, लिट्–ममथ, लुट्–मथिता, लुङ–अमथीत्, कर्म० मथ्यते ।

मघ्—१ आ०, गत्याक्षेपे आरम्भे कैतवे च (शीघ्र चलना, प्रस्थान करना, प्रारम्भ करना, धोखा देना), लट्–मघते, लिट्–ममघे, लुट्–मघिता, लुङ–अमघिष्ट, आ० लिङ–मघिषीष्ट ।

मंच्—१ आ०, दम्भे कत्थने कल्कने च (धोखा देना, दुष्ट होना, अपनी प्रशंसा करना, पीसना), लट्–मचते, लिट्–मेचे, लुट्–मचिता, लुङ–अमचिष्ट ।

मंच्—१ आ०, धारणोच्छ्रायपूजनेषु (पकड़ना, ऊँचा होना, जाना, सजाना, चमकना), लट्–मञ्चते, लिट्–ममञ्चे, लुट्–मञ्चिता, लुङ–अमञ्चिष्ट ।

मञ्ज्—१० उ०, शब्दे (शब्द करना), लट्–मञ्जयति–ते, लिट–मञ्जयाचकार–चक्रे, लुट्–मञ्जयिता, लुङ–अमिमञ्जत्–त ।

मठ—१ प०, मर्दननिवासनयो (पीसना, रहना, जाना), लट्–मठति, लिट्–ममाठ, लुट्–मठिता, लुङ–अमठीत् ।

मण्ठ—१ आ०, शोके (शोकपूर्वक स्मरण करना, चाहना), लट्–मण्ठते, लिट्–ममण्ठे, लुट्–मण्ठिता, लुङ–अमण्ठिष्ट ।

मण्—१ प०, शब्दे, (शब्द करना, चरचर करना), लट्–मणति, लिट्–ममाण, लुट्–मणिता, लुङ–अमणीत् ।

मण्ड्—१ प०, भूषायाम् (अपने आपको सजाना), लट्–मण्डति, लिट्–ममण्ड, लुट्–मण्डिता, लृट्–मण्डिष्यति, लुङ–अमण्डीत्, आ० लिङ–मण्ड्यात् । णिच्–लट्–मण्डयति–ते, लुङ–अममण्डत्–त । सन्– मिमण्डिषति ।

मण्ड्—१ आ०, विभाजने (बाँटना), लट्–मण्डते, लिट्–ममण्डे, लुट्–मण्डिता, लृट्–मण्डिष्यते, लुङ–अमण्डिष्ट, आ० लिङ–मण्डिषीष्ट । सन्–मिमण्डिषते, कर्म०–लट् मण्ड्यते, लुङ–अमण्डि ।

मण्ड्—१० उ०, (सजाना), लट्–मण्डयति–ते, लिट्–मण्डयाचकार–चक्रे, लुट्–मण्डयिता, लुङ–अममण्डत्–त, आ० लिङ–मण्ड्यात्, मण्डयिषीष्ट । सन्–मिमण्डयिषति–ते ।

मथ्—१ प०, विलोडने (मथना, हिलाना), लृट्–मथिष्यति, लुङ–अमथीत् । णिच्–लट्–माथयति–ते, लुङ–अमीमथत्–त, सन्–मिमथिषते ।

मद्—४ प०, हर्षग्लेपनयो. (प्रसन्न होना, दयनीय दशा मे होना), लट्–माद्यति, लिट्–ममाद, लुट्–मदिता, लृट्–मदिष्यति, लुङ–अमदीत्, अमादीत्, णिच्–लट्–मदयति–ते, (मादयति–ते, प्रमत्त करना) लुङ–अमीमदत्–त । सन्–मिमदिषति, यङन्त–मामद्यते, मामदीति, मामत्ति, कर्म० लट्–मद्यते, लुङ–अमादि–अमदि, क्त–मत्त ।

मद्—१० आ०, तृप्तियोगे (प्रसन्न करना), लट्–मादयते, लिट्–मादयाचक्रे, लुट्–मादयिता, लृट्–मादयिष्यते, लुङ–अमीमदत, आ० लिङ–मादयिषीष्ट । सन्–मिमादयिषते, कर्म० लट्–माद्यते, लुङ–अमादि, क्त–मादित ।

मन्—४ आ०, ज्ञाने (जानना, सोचना), लट्–मन्यते, लिट्–मेने, लुट्–
मन्ता, लृट्–मंस्यते, लृङ–अमंस्यत, लुङ–अमंस्त, आ० लिङ–मंसीष्ट । सन्–
मिमंसते, णिच्–लट्–मानयति-ते, लुङ–अमीमनत्–त, यङन्त–मम्मन्यते, मम्म-
नीते, मम्मन्ति, क्त–मत, क्त्वा–मत्वा, तुम्–मन्तुम् ।

मन्—८ आ०, अवबोधने (सोचना, मानना), लट्–मनुते, लिट्–मेने,
लुट्—मनिता, लृट्–मनिष्यते, लुङ–अमनिष्ट, अमत, (म० पु० एक० अमनिष्ठा,
अमथा) । सन्–मिमनिषते, तुम्–मनितुम्, णिच्–पूर्ववत् ।

मन्—१० आ०, स्तम्भे (गर्वयुक्त होना), लट्–मानयते, लिट्–मानयाञ्चक्रे,
लुट्–मानयिता, लुङ–अमीमनत, आ० लिङ–मानयिषीष्ट सन्–मिमानयिषते,
कर्म० लट्–मान्यते, क्त–मानित ।

मन्त्र्—१० आ०, गुप्तपरिभाषणे (मन्त्रणा करना, सम्मति देना, राय लेना,
कहना), लट्–मन्त्रयते, (कभी मन्त्रयति भी होता है), लिट्–मन्त्रयाञ्चक्रे, लुट्–
मन्त्रयिता, लृट्–मन्त्रयिष्यते, लुङ–अममन्त्रत । सन्–मिमन्त्रयिषते, क्त–मन्त्रित,
क्त्वा–मन्त्रयित्वा ।

मन्थ्—१ प०, ९ प०, विलोडने (मथना, क्षुब्ध करना), लट्–मन्थति,
मथ्नाति (म० पु० एक० लोट्–मथान), लिट्–ममन्थ, लुट्–मन्थिता, लृट्–
मन्थिष्यति, लुङ–अमन्थीत्, आ० लिङ–मथ्यात् । सन्–मिमन्थिषति, कर्म०
मथ्यते लट्–मथ्यते, लुङ–अमन्थि, णिच्–लट्–मन्थयति–ते, लुङ–अममन्थत्–त,
यङन्त–मामथ्यते, मामन्थीति, मामन्ति, क्त–मथित, क्त्वा–मन्थित्वा, शतृ–
मन्थत् (१), मथ्नत् (९) ।

मन्थ्—१ प०, हिंसासंक्लेशनयो (मारना, दुःख देना), लट्–मन्थति, लिट्–
ममन्थ, लुट्–मन्थिता, लृट्–मन्थिष्यति, लुङ–अमन्थीत्, कर्म० लट्–मन्थ्यते,
लुङ–अमन्थि, क्त–मन्थित, क्त्वा–मन्थित्वा ।

मन्द्—१ आ०, स्तुतिमोदमदस्वप्नकान्तिगतिषु (प्रशंसा करना, प्रशंसित
होना, प्रसन्न होना, प्रमत्त होना, सोना, चमकना, मन्द-गति होना), लट्–मन्दते,
लिट्–ममन्दे, लुट्–मन्दिता, लृट्–मन्दिष्यते, लुङ–अमन्दिष्ट, आ० लिङ–मन्दि-
षीष्ट, कर्म० लट्–मन्द्यते ।

मभ्र्—१ प०, गतौ (जाना, हिलना), लट्–मभ्रति, लिट्–ममभ्र, लुट्–
मभ्रिता, लुङ–अमभ्रीत् ।

मय्—१ आ० (जाना, हिलना), लट्–मयते, लिट्–ममये, लुट्–मयिता,
लुङ–अमयिष्ट, आ० लिङ–मयिषीष्ट ।

मर्च्—१० उ०, शब्दे ग्रहणे च (लेना, शब्द करना, जाना, चोट पहुँचाना),
लट्–मर्चयति-ते, लिट्–मर्चयाञ्चकार-चक्रे, लुट्–मर्चयिता, लुङ–अममर्चत्–त,
आ० लिङ–मर्च्यात्, मर्चयिषीष्ट ।

मर्ब्—१ प० (जाना, हिलना), लट्–मर्बति, लिट्–ममर्ब, लुट्–मर्बिता,
लुङ–अमर्बीत् ।

मर्व्—१ प०, पूरणे (पूरा करना), लट्–मर्वति, लिट्–ममर्व, लुट्–मर्विता, लुङ–अमर्वीत् । णिच्–(शब्द करना), लट्–मर्वयति-ते ।

मल्—१ आ०, १० उ०, धारणे (पकडना, रखना), लट्–मलते, मलयति-ते, लिट्–मेले, मलयाचकार-चक्रे, लुट्–मलिता, मलयिता, लुङ–अमलिष्ट, अमीमलत्–त ।

मल्ल्—१ आ०, (पकडना, रखना), लट्–मल्लते, शेष पूर्ववत् ।

मव्—१ प०, बन्धने हिंसायां च (बांधना, हिंसा करना), लट्–मवति, लिट्–ममाव, लुट्–मविता, लुङ–अमवीत्–अमावीत् ।

मश्—१ प०, शब्दे कोपे च (गूंजना, क्रोध करना), लट्–मशति, लिट्–ममाश, लुट्–मशिता, लुङ–अमशीत्–अमाशीत् ।

मष्—१ प०, हिंसायां शब्दे च (चोट मारना, नष्ट करना), लट्–मषति, लिट्–ममाष, लुट्–मषिता, लुङ–अमषीत्–अमाषीत् ।

मस्—४ प०, परिमाणे (तोलना, बदलना), लट्–मस्यति, लिट्–ममास, लुट्–मसिता, लुङ–अमसत्, क्त–मस्त, तुम्–मसितुम् ।

मस्क्—१ आ० (जाना, हिलना), लट्–मस्कते, लिट्–ममस्के, लुट्–मस्किता, ऌट्–मस्किष्यते, लुङ–अमस्किष्ट ।

मस्ज्—६ प०, शुद्धौ (नहाना, डूबना, शुद्ध करना), लट्–मज्जति, लिट्–ममज्ज, (म० पु० एक० ममज्जिथ, ममङ्क्थ) लुट्–मङ्क्ता, ऌट्–मङ्क्ष्यति, लुङ–अमाङ्क्षीत्, (प्र० पु० द्वि० अमाङ्क्ताम्), आ० लिङ–मज्ज्यात् । सन्–मिमङ्क्षति, णिच्–लट्–मज्जयति, लुङ–अममज्जत्–त, कर्म० मज्ज्यते, क्त–मग्न ।

मह्—१ प०, १० उ०, पूजायाम् (आदर करना, प्रसन्न होना, बढाना), लट्–महति, महयति-ते, लिट्–ममाह, महयाचकार-चक्रे, लुट्–महिता, महयिता, लुङ–अमहीत्, अममहत्–त । सन्–मिमहिषति, मिमहयिषति, णिच् (१ प०)–माहयति-ते, लुङ–अमीमहत्–त, कर्म० लट्–मह्यते, क्त–महित, तुम्–महितुम्–महयितुम् ।

मही–१० आ०, पूजायाम् (आदर करना), लट्–महीयते, लिट्–महीयाचक्रे, ऌट्–महीयिष्यते, लुङ–अमहीयिष्ट ।

मा—२ प०, माने (तोलना, तुलना करना, बनाना, दिखाना आदि), लट्–माति, लिट्–ममौ, लुट्–माता, ऌट्–मास्यति, ऌङ–अमास्यत्, लुङ–अमासीत्, आ० लिङ–मेयात् । सन्–मित्सति, यङन्त–मेमीयते, मामाति, मामेति, कर्म० लट्–मीयते, लुङ–अमायि, णिच्–लट्–मापयति-ते, लुङ–अमीमपत्–त, क्त–मित, क्त्वा–मित्वा ।

मा—३ और ४ आ०, (नापना, तोलना आदि), लट्–मिमीते, मायते, लिट्–ममे, लुट्–माता, ऌट्–मास्यते, लुङ–अमास्त, आ० लिङ–मासीष्ट । सन्–मित्सते (शेष रूप पूर्ववत्) ।

मांक्ष—१ प०, काङ्क्षायाम् (चाहना), लट्–मांक्षति, लुङ्–अमांक्षीत् ।

मान्—१ आ०, जिज्ञासायाम् (जिज्ञासा करना), लट्–मीमांसते, लिट्–मीमांसाञ्चभूव-आस-चक्रे, लुट्–मीमांसिता, लुङ्–अमीमांसिष्ट, आ०, लिङ्–मीमांसिसीष्ट । सन्–मीमांसिषते, णिच्–लुङ्–अमीमांसत्-त, कर्म० लट्–मीमांस्यते, लुङ्–अमीमांसि, क्त–मीमांसित ।

मान्—१० आ०, स्तम्भे (रोकना, गर्वयुक्त होना), लट्–मानयते, लृट्–मानयिष्यते, लुङ्–अमीमनत, आ० लिङ्–मानयिषीष्ट ।

मान्—१० प०, १ प०, पूजायाम् (आदर करना, पूजा करना), लट्–मानयति, मानति, लुङ्–अमीमनत्, अमानीत् । सन्–मिमानयिषति–मिमानिषति ।

मार्ग्—१ प०, अन्वेषणे (खोजना, ढूंढना, पीछा करना), लट्–मार्गति, लिट्–ममार्ग, लुट्–मार्गिता, लुङ्–अमार्गीत् । सन्–मिमार्गिषति, कर्म० लट्–मार्ग्यते, लुङ्–अमार्गि ।

मार्ग्—१० उ०, (ढूंढना, जाना, सजाना), लट्–मार्गयति-ते, लिट्–मार्गयाञ्चकार-चक्रे, लुट्–मार्गयिता, लृट्–मार्गयिष्यति-ते, लुङ्–अममार्गत्-त, आ० लिङ्–मार्ग्यात्–मार्गयिषीष्ट, क्त–मार्गित, तुम्–मार्गयितुम् ।

मार्ज्—१० उ०, शब्दे शुद्धौ च (शब्द करना, पवित्र करना, साफ करना), लट्–मार्जयति-ते, लिट्–मार्जयाञ्चकार-चक्रे, लुट्–मार्जयिता, लुङ्–अममार्जत्-त, आ० लिङ्–मार्ज्यात्–मार्जयिषीष्ट । सन्–मिमार्जयिषति-ते ।

मि—५ उ०, प्रक्षेपणे (फेंकना, फैलाना, तोलना), लट्–मिनोति, मिनुते, लिट्–ममौ, मिम्ये, लुट्–माता, लृट्–मास्यति-ते, लुङ्–अमासीत्, अमास्त, आ० लिङ्–मीयात्–मासीष्ट । सन्–मित्सति-ते, कर्म० लट्–मीयते, णिच्–लट्–मापयति-ते, लुङ्–अमीमपत्–त, क्त–मित ।

मिथ्—१ उ०, मेधाहिंसयोः (मिलना, समझना, हिंसा करना, पकड़ना), लट्–मेथति-ते, लिट्–मिमेथ, मिमिथे, लुट्–मेथिता, लुङ्–अमेथीत्, अमेथिष्ट, आ० लिङ्–मिथ्यात्–मेथिषीष्ट ।

मिद्—१ आ०, स्नेहने (गीला होना, चिकनाना, प्रेम करना), लट्–मेदते, लिट्–मिमिदे, लुट्–मेदिता, लुङ्–अमिदत्–अमेदिष्ट, आ० लिङ्–मेदिषीष्ट । सन्–मिमिदिषते–मिमेदिषते । णिच्–लट्–मेदयति-ते, लुङ्–अमीमिदत्–त, क्त–मिन्न, मेदित, क्त्वा–मिदित्वा, मेदित्वा ।

मिद्—४ प० (पिघलाना, आदि), लट्–मेद्यति, लिट्–मिमेद, लुट्–मेदिता, लुङ्–अमिदत् । सन्–मिमिदिषति, मिमेदिषति ।

मिद्—१ उ० (मिथ् के तुल्य), लट्–मेदति-ते ।

मिन्द्—१ प०, १० उ०, लट्–मिन्दति, मिन्दयति-ते, लुट्–मिन्दिता, मिन्दयिता, लुङ्–अमिन्दीत्–अमिमिन्दत्–त, आ० लिङ्–मिन्द्यात्–मिन्दयिषीष्ट ।

मिन्व्—१ प०, स्नेहने सेचने च (आदर करना, सींचना), लट्–मिन्वति, लिट्–मिमिन्व, लृट्–मिन्विष्यति, लुङ–अमिन्वीत्, कर्म०–मिन्व्यते ।

मिल्—६ उ०, सगमे (मिलना, एक होना), लट्–मिलति-ते, लिट्–मिमेल-मिमिले, लुट्–मेलिता, लृट्–मेलिष्यति-ते, लृङ–अमेलिष्यत्–त, लुङ–अमेलीत्–अमेलिष्ट । सन्–मिमिलिषति-ते, मिमेलिषति-ते, कर्म०–लट्–मिल्यते, लुङ–अमेलि, णिच्–लट्–मेलयति-ते, लुङ–अमीमिलत्–त, क्त–मिलित, क्त्वा–मिलित्वा, मेलित्वा ।

मिश्—१ प०, शब्दे रोषकृते च (हल्ला करना, क्रोध करना), लट्–मेशति, लिट्–मिमेश, लुट्–मेशिता, लुङ–अमेशीत् ।

मिश्र्—१० उ०, सपर्के (मिलाना), लट्–मिश्रयति-ते, लिट्–मिश्रयाचचार-चक्रे, लुट्–मिश्रयिता, लुङ–अमिमिश्रत्–त, आ० लिङ–मिश्र्यात्, मिश्रयिषीष्ट । सन्–मिमिश्रयिषति–ते, क्त–मिश्रित, क्त्वा–मिश्रयित्वा ।

मिष्—६ प० (आँख खोलना, देखना), लट्–मिषति, लिट्–मिमेष, लुट्–मेषिता, लुङ–अमेषीत्। सन्–मिमिषिषति, मिमेषिषति, क्त्वा–मिषित्वा, मेषित्वा ।

मिष्—१ प०, सेचने (सींचना, गीला करना), लट्–मेषति, (शेष पूर्ववत्)। क्त्वा–मिषित्वा, मेषित्वा, मिष्ट्वा ।

मिह्—१ प०, सेचने (गीला करना, मूत्र करना), लट्–मेहति, लिट्–मिमेह, लुट्–मेढा, लृट्–मेक्ष्यति, लुङ–अमिक्षत् । सन्–मिमिक्षति, णिच्–लट्–मेहयति-ते, लुङ–अमीमिहत्–त, क्त–मीढ, क्त्वा–मीढ्वा, तुम्–मेढुम् ।

मी—४ आ०, हिंसायाम्, (हिंसाऽत्र प्राणवियोग) (मरना, नष्ट होना), लट्–मीयते, लिट्–मिम्ये, लृट्–मेष्यते, लुङ–अमेष्ट । सन्–मिमीषते, णिच्–लट्–माययति-ते, लुङ–अमीमयत्–त ।

मी—६ उ०, हिंसायाम् (हिंसा करना, कम करना, बदलना, नष्ट होना), लट्–मीनाति, मीनीते, लिट्–ममौ, मिम्ये, लुट्–माता, लुङ–अमासीत्, अमास्त, आ० लिङ–मीयात्–मासीष्ट । सन्–मित्सति-ते, कर्म० लट्–मीयते, णिच्–लट्–मापयति-ते, लुङ–अमीमपत्–त, क्त–मीत, क्त्वा–मीत्वा ।

मी—१ प०, १० उ० गतौ (जाना, समझना), लट्–मयति, माययति-ते, लिट्–मिमाय, माययाचकार-चक्रे, लुट्–मेता, माययिता, लुङ–अमैषीत्–अमीमयत्–त ।

मील्—१ प०, निमेषणे (आँख आदि बन्द करना, फूलों आदि का बन्द होना, मिलना, बन्द करना), लट्–मीलति, लिट्–मिमील, लुट्–मीलिता, लुङ–अमीलीत् । णिच्–लट्–मीलयति-ते, लुङ–अमीमिलत्–त, अमिमीलत्–त । सन्–मिमीलिषति ।

मीव्—१ प०, स्थौल्ये (मोटा होना, जाना), लट्–मीवति, लिट्–मिमीव, लुट्–मीविता, लुङ–अमीवीत् ।

मच्—१ आ०, कल्कने (धोखा देना), लट्–मुञ्चते, लिट्–मुमुञ्चे, लुङ–अमुञ्चिष्ट ।

मुच्—६ उ०, मोक्षणे (छोडना, मुक्त करना, त्यागना), लट्–मुञ्चति–ते, लिट्–मुमोच, मुमुचे, लुट्–मोक्ता, लट्–मोक्ष्यति–ते, लुङ–अमुचत्, अमुक्त, आ० लिङ–मुच्यात्, मुक्षीष्ट । सन्–मुमुक्षति (मुमुक्षते, मोक्षते, अवमेव), णिच्–लट्–मोचयति–ते, लुङ–अमूमुचत्–त, क्त–मुक्त, क्त्वा–मुक्त्वा ।

मुज्, मुञ्ज्—१ प०, १० उ०, शब्दे (साफ करना, पवित्र करना, शब्द करना), लट्–मोजति, मुञ्जति, मोजयति–ते, मुञ्जयति–ते, लिट्–मुमोज, मुमुञ्ज, मोजयाचकार–चक्रे, मुञ्जयाचकार–चक्रे ।

मुट्—१ प०, मर्दने (रगडना, पीसना, हिंसा करना), लट्–मोटति, लिट्–मुमोट, लुट्–मोटिता, लुङ–अमोटीत् ।

मुट्—६ प०, आक्षेपमर्दनबन्धनेषु (दोष लगाना, दबाना, बांधना), लुट्–मुटति, शेष पूर्ववत् ।

मुट्—१० उ०, सचूर्णने (तोडना, चूरा करना), लट्–मोटयति–ते, लुङ–अमूमुटत्–त ।

मुण्ट्—१ प०, मर्दने (पीसना, रगडना), लट्–मुण्टति, लिट्–मुमुण्ट, लुट्–मुण्टिता, लुङ–अमुण्टीत् ।

मुण्ठ्—१ आ०, पालने पलायने वा (रक्षा करना, भाग जाना), लट्–मुण्ठते, लिट्–मुमुण्ठे, लुट्–मुण्ठिता, लुङ–अमुण्ठिष्ट, आ० लिङ–मुण्ठिषीष्ट, कर्म०–लट्–मुण्ठ्यते, ।

मुण्ड्—१ प०, खण्डने (मुण्डन कराना, पीसना), लट्–मुण्डति, लिट्–मुमुण्ड, लुट्–मुण्डिता, लुङ–अमुण्डीत् । सन्–मुमुण्डिषति, णिच्–लट्–मुण्डयति–ते, लुङ–अमुमुण्डत्–त ।

मुण्ड्—१ आ०, मार्जने मज्जने वा (डूबना), लट्–मुण्डते, लिट्–मुमुण्डे, लुट्–मुण्डिता, लुङ–अमुण्डिष्ट ।

मुण्—६ प०, प्रतिज्ञाने (प्रतिज्ञा करना), लट्–मुणति, लिट्–मुमोण, लुट्–मोणिता, लुङ–अमोणीत् ।

मुद्—१ आ०, हर्षे (आनन्दित होना, प्रसन्न होना), लट्–मोदते, लिट्–मुमुदे, लुट्–मोदिता, लट्–मोदिष्यते, लुङ–अमोदिष्ट, आ० लिङ–मोदिषीष्ट, सन्–मुमुदिषते, मुमोदिषते, क्त–मुदित, मोदित ।

मुद्—१० उ०, संसर्गे (मिलाना, पवित्र करना), लट्–मोदयति–ते, लिट्–मोदयाचकार–चक्रे, लुट्–मोदयिता, लुङ–अमूमुदत्–त ।

मुर्—६ प०, संवेष्टने (ढकना), लट्–मुरति, लिट्–मुमोर, लुङ्–अमोरीत् ।

मुर्छ्—१ प०, मोहसमुच्छ्राययोः (मूर्च्छित होना, संज्ञाहीन होना, बढ़ना, व्याप्त होना, योग्य होना), लट्–मूर्च्छति, लिट्–मुमूर्च्छ, लुट्–मूर्च्छिता, लुङ्–अमूर्च्छीत्, आ० लिङ्–मूर्च्छ्यात्, णिच्–लट्–मूर्च्छयति-ते, लुङ्–अमुमूर्च्छत्–त । सन्–मुमूर्च्छिषति, क्त–मूर्छित, मूर्त ।

मुर्व्—१ प०, बन्धने (बाँधना), लट्–मुर्वति, लिट्–मुमुर्व, लुट्–मुर्विता, लुङ्–अमुर्वीत् ।

मुल्—देखो मूल् धातु ।

मुष्—९ प०, स्तेये (चुराना), लट्–मुष्णाति, लोट्–म० पु० एक० मुषाण, लिट्–मुमोष, लुट्–मोषिता, लृट्–मोषिष्यति, लुङ्–अमोषीत्, आ० लिङ्–मुष्यात् । सन्–मुमुषिषति, क्त–मुषित, क्त्वा–मुषित्वा, ल्यप्–सम्मुष्य, तुम्–मोषितुम् ।

मुस्—४ प०, खण्डने (फाड़ना, टुकड़े करना), लट्–मुस्यति, लिट्–मुमोस ।

मुस्त्—१० उ०, सघाते (ढेर लगाना, इकट्ठा करना), लट्–मुस्तयति, –ते, लिट्–मुस्तयाचकार-चक्रे, लुट्–मुस्तयिता, लुङ्–अमुमुस्तत्–त, आ० लिङ्–मुस्त्यात्, मुस्तयिषीष्ट ।

मुह्—४ प०, वैचित्ये (मूर्च्छित होना, चक्कर खाना, गिरना, त्रुटि/करना, मूर्ख होना), लट्–मुह्यति, लिट्–मुमोह, लुट्–मोहिता, मोग्धा, मोढा, लृट्–मोहिष्यति, मोक्ष्यति, लृङ्–अमोहिष्यत्–अमोक्ष्यत्, लुङ्–अमुहत्, आ० लिङ्–मुह्यात् । सन्–मुमुहिषति, मुमोहिषति, मुमुक्षति, कर्म०–लट्–मुह्यते, लुङ्–अमोहि, णिच्–लट्–मोहयति-ते, लुङ्–अमूमुहत्–त, क्त–मुग्ध–मूढ, क्त्वा–मोहित्वा, मुग्ध्वा, मूढ्वा, ल्यप्–सम्मुह्य, तुम्–मोहितुम्, मोग्धुम्, मोढुम् ।

मू—१ आ०, बन्धने (बाँधना), लट्–मवते, लिट्–मुमुवे, लृट्–मविष्यते, लुङ्–अमविष्ट ।

मूल्—१ प०, प्रतिष्ठायाम् (दृढ होना), लट्–मूलति, लिट्–मुमूल, लुट्–मूलिता, लुङ्–अमूलीत् । सन्–मुमूलिषति, णिच्–लट्–मूलयति-ते, लुङ्–अमूमुलत्–त ।

मूल्—१० उ०, रोपणे (पेड़ लगाना, अंकुरित होना), लट्–मूलयति–ते, लिट्–मूलयाचकार-चक्रे, लुट्–मूलयिता, लुङ्–अमूमुलत्–त, सन्–मुमूलयिषति-ते, क्त–मूलित ।

मूष्—१ प०, स्तेये (चुराना), लट्–मूषति, लिट्–मुमूष, लुङ्–अमूषीत् । सन्–मुमूषिषति, णिच्–लट्–मूषयति-ते, लुङ्–अमूमुषत्–त, क्त–मूषित ।

मृ—६ आ०[1], प्राणत्यागे (मरना, नष्ट होना), लट्–म्रियते, लिट्–ममार, लुट्–मर्ता, लृट्–मरिष्यति, लुङ्–अमृत, आ० लिङ्–मृषीष्ट । सन्–मुमूर्षति, कर्म० लट्–म्रियते, णिच्–लट्–मारयति-ते, लुङ्–अमीमरत्–त, क्त–मृत, तुम्–मर्तुम्, क्त्वा–मृत्वा ।

मृक्ष्—१ प०, संघाते (इकट्ठा करना), लट्–मृक्षति, लिट्–ममर्क्ष, लुङ्–अमृक्षीत् ।

मृग्—४ प०, अन्वेषणे (ढूंढना, शिकार खेलना, परीक्षा करना, मांगना), लट्–मृग्यति, लिट्–ममर्ग, लुट्–मर्गिता, लृट्–मर्गिष्यति, लुङ्–अमर्गीत्, क्त–मृगित ।

मृग्—१० आ०, अन्वेषणे (ढूंढना आदि), लट्–मृगयते, लिट्–मृगयाचक्रे, लुट्–मृगयिता, लृट्–मृगयिष्यते, लुङ्–अममृगत, आ० लिङ्–मृगयिषीष्ट । सन्–मिमृगयिषते, कर्म० लट्–मृग्यते, लुङ्–अमर्गि ।

मृज्—१ प०, शौचालङ्कारयो (सफाई करना, आदि), लट्–मार्जति, लिट्–ममार्ज, (नीचे की मृज् धातु देखो) ।

मृज्—२ प०, शुद्धौ (स्वच्छ करना, शासन करना, घोडा आदि ले जाना, सजाना), लट्–मार्ष्टि, लिट्–ममार्ज, लुट्–मार्जिता, मार्ष्टा, लृट्–मार्जिष्यति, मार्क्ष्यति, लृङ्–अमार्जिष्यत्–अमार्क्ष्यत्, लुङ्–अमार्जीत्–अमार्क्षीत्, आ० लिङ्–मृज्यात् । सन्–मिमृक्षति, मिमार्जिषति, कर्म०–लट्–मृज्यते, लुङ्–अमार्जि, णिच्–लट्–मार्जयति-ते, लुङ्–अममार्जत्–त, अमीमृजत्–त, क्त–मृष्ट, मार्जित ।

मृज्—१० उ०, शौचालङ्करयो (स्वच्छ करना, आदि), लट्–मार्जयति-ते, लिट्–मार्जयाचकार-चक्रे, लुट्–मार्जयिता, लृट्–मार्जयिष्यति-ते, लुङ्–अममार्जत्–त, अमीमृजत्–त, कर्म० लट्–मार्ज्यते, लुङ्–अमार्जि ।

मृड्—६ और ९ प०, सुखने (दया करना, क्षमा करना, प्रसन्न होना), लट्–मृडति, मृड्नाति, लिट्–ममर्ड, लुट्–मर्डिता, लुङ्–अमर्डीत् ।

मृण्—६ प० हिंसायाम् (मारना, नष्ट करना), लट्–मृणति, लिट्–ममर्ण, लुङ्–अमर्णीत् ।

मृद्—९ प०, क्षोदे (दबाना, मारना, रगडना), लट्–मृद्नाति, लिट्–ममर्द, लुट्–मर्दिता, लृट्–मर्दिष्यति, लृङ्–अमर्दिष्यत्, लुङ्–अमर्दीत् । कर्म०–लट्–मृद्यते, लुङ्–अमर्दि, णिच्०–लट्–मर्दयति-ते, लुङ्–अमीमृदत्–त, अममर्दत्–त । सन्–मिमर्दिषति, क्त–मृदित ।

मृध्—१ उ०, उन्दने हिंसायां च (गीला होना, मारना, वेद में इसका मारना अर्थ है, अनादर करना), लट्–मर्धति-ते, लिट्–ममर्ध, ममृधे, लुङ्–अमर्धीत्–अमर्धिष्ट, क्त्वा–मर्धित्वा, मृद्ध्वा ।

---

१. मृ धातु इन स्थानों पर परस्मैपदी है—लिट्, लुट्, लृट्, लृङ् और सन् ।

मृश्—६ प०, आमर्शने (छूना, हिलाना, विचार करना), लट्–मृशति, लिट्–ममर्श, लुट्–मर्ष्टा,म्रष्टा, लृट्–मर्क्ष्यति–म्रक्ष्यति, लुङ्–अमार्क्षीत्, अम्राक्षीत्, अमृक्षत् । सन्–मिमृक्षति, कर्म० लट्–मृश्यते, लुङ्–अमर्शि, णिच्–लट्–मर्शयति-ते, लुङ्–अमीमृशत्–त, अममर्शत्–त, क्त–मृष्ट, क्त्वा–मृष्ट्वा ।

मृष्—१ प०, सेचने (सीचना, सहन करना), लट्–मर्षति, लिट्–ममर्ष, लुट्–मर्षिता, लुङ्–अमर्षीत्, णिच्-लट्–मर्षयति-ते, लुङ्–अममर्षत्–त, अमीमृषत्–त ।

मृष्—१ उ०, सहने (सहन करना, सीचना), लट्–मर्षति, (शेष रूप नीचे को धातु के तुल्य) ।

मृष्—४ उ०, तितिक्षायाम् (दु.ख सहना, क्षमा करना), लट्–मृष्यति-ते, लिट्–ममर्ष, ममृषे, लुट्–मर्षिता, लृट्–मर्षिष्यति-ते, लुङ्–अमर्षीत्–अमर्षिष्ट । सन्–मिमर्षिषति, कर्म० लट्–मृष्यते, णिच्–लट्–मर्षयति-ते, क्त्वा–मर्षित्वा, मृषित्वा ।

मृष्—१० उ०, (दु.ख सहना, आदि), लट्–मर्षयति-ते, लिट्–मर्षयाचकार-चक्रे, लुङ्–अमीमृषत्–त, अममर्षत्–त ।

मॄ—६ प०, हिंसायाम् (मारना, हानि पहुँचाना), लट्–मृणाति, लिट्–ममार, लुट्–मरिता, मरीता, लृट्–मरिष्यति, मरीष्यति, लुङ्–अमारीत् । सन्–मिमरिषति, मिमरीषति, मुमूर्षति ।

मे—१ आ०, प्रणिदाने (अदल-बदल करना), लट्–मयते, लिट्–ममे, लुट्–माता, लृट्–मास्यते, लुङ्–अमास्त, आ० लिङ्–मासीष्ट । सन्–मित्सते, णिच्–लट्–मापयति-ते, लुङ्–अमीमपत्–त, कर्म० लट्–मीयते; लुङ्–अमायि ।

मेट्-मेड्—१ प०, (पागल होना), लट्–मेटति, मेडति ।

मेथ्—१ उ०, मेधाहिंसनयो: (जानना, दु.ख देना), लट्–मेथति-ते, लिट्–मिमेथ-थे, लुट्–मेथिता, लुङ्–अमेथिष्ट ।

मेद्-मेध्—१ उ०, सगमे (मिलना), पूर्ववत् ।

मेप्—१ आ०, गतौ (जाना, हिलना), लट्–मेपते, लिट्–मिमेपे, लुङ्–अमेपिष्ट ।

मेव्—१ आ०, सेवने (सेवा करना, पूजा करना), लट्–मेवते ।

मोक्ष्—१ प०, १० उ०, (मुक्त करना, छोड़ना), लट्–मोक्षति, मोक्षयति-ते, लिट्–मुमोक्ष, मोक्षयाचकार-चक्रे ।

म्ना—१ प०, अभ्यासे, (मन मे दुहराना, पढना, याद करना, वेद मे प्रशसा करना अर्थ है), लट्–मनति, लिट्–मम्नौ, लुट्–म्नाता, लृट्–म्नास्यति, लुङ्–अम्नासीत्, आ० लिङ्–म्नायात्–म्नेयात् । सन्–मिम्नासति, णिच्–लट्–म्नापयति-ते, लुङ्–अमिम्नपत्–त, कर्म० लट्–म्नायते, लुङ्–अम्नायि, क्त–म्नात ।

म्रक्ष्—१ प०, संघाते (इकट्ठा करना, चोट मारना), लट्–म्रक्षति, लिट्–मम्रक्ष, लुट्–म्रक्षिता, लुङ्–अम्राक्षीत् ।

म्रक्ष्—१० उ०, संयोजने स्नेहने म्लेच्छने च (ढेर लगाना, मिलाना, चिकनाना, अस्पष्ट बोलना), लट्–म्रक्षयति-ते, लिट्–म्रक्षयाञ्चकार-चक्रे, लुट्–म्रक्षयिता, लुङ्–अमम्रक्षत्–त, आ० लिङ्–म्रक्ष्यात्–म्रक्षयिषीष्ट ।

म्रद्—१ आ०, मर्दने (रगड़ना, पीसना), लट्–म्रदते, लिट्–मम्रदे, लृट्–म्रदिष्यते, लुङ्–अम्रदिष्ट । सन्–मिम्रदिषते ।

म्रुच्—१ प० (जाना), लट्–म्रोचति, लिट्–मुम्रोच, लुङ्–अम्रुचत्, अम्रोचीत् । सन्–मुम्रुचिषति, मुम्रोचिषति । क्त्वा–म्रोचित्वा, म्रुचित्वा ।

म्रुञ्च्—१ प० (जाना), लट्–म्रुञ्चति, लिट्–मुम्रुञ्च, लृट्–म्रुञ्चिष्यति, लुङ्–अम्रुञ्चीत् । सन्–मुम्रुञ्चिषति, क्त–म्रुक्त, क्त्वा–म्रुञ्चित्वा, म्रुक्त्वा ।

म्रेट् (म्रेड्)–१ प०, (पागल होना), लट्–म्रेटति–म्रेडति ।

म्लक्ष्—१० उ० (काटना, पृथक् करना), लट्–म्लक्षयति-ते, लिट्–म्लक्षयाञ्चकार-चक्रे, लुट्–म्लक्षयिता, लुङ्–अमम्लक्षत्–त ।

म्लुच्—१ प० (जाना), लट्–म्लोचति, लिट्–मुम्लोच, लुट्–म्लोचिता, लृट्–म्लोचिष्यति, लुङ्–अम्लुचत्–अम्लोचीत् ।

म्लुञ्च्—१ प० (जाना), लट्–म्लुञ्चति, लिट्–मुम्लुञ्च ।

म्लेच्छ्—१ प०, १० उ०, अव्यक्ते शब्दे (अस्फुटे अपशब्दे च), (अस्पष्ट बोलना या जंगली की तरह बोलना), लट्–म्लेच्छति-ते लिट्–मिम्लेच्छ, म्लेच्छयाञ्चकार–चक्रे, लुङ्–अम्लेच्छीत्, अमिम्लेच्छत्–त । सन्–मिम्लेच्छिषति, मिम्लेच्छयिषति-ते, क्त–म्लिष्ट, म्लेच्छित ।

म्लेट्, म्लेड्—१ प०, उन्मादे (पागल होना), लट्–म्लेटति, म्लेडति, अम्लेटीत्–अम्लेडीत् ।

म्लेव्—१ आ०, सेवने (सेवा करना, पूजा करना), लट्–म्लेवते, लिट्–मिम्लेवे, लृट्–म्लेविष्यते, लुङ्–अम्लेविष्ट ।

म्लै—१ प०, हर्षक्षये (मुरझाना, खिन्न होना, दुःखित होना), लट्–म्लायति, लिट्–मम्लौ, लुट्–म्लाता, लृट्–म्लास्यति, लुङ्–अम्लासीत्, आ० लिङ्–म्लायात्–म्लेयात् । णिच्–लट्–म्लापयति-ते, लुङ्–अमिम्लपत्–त, सन्–मिम्लासति, कर्म० लट्–म्लायते, लुङ्–अम्लायि, क्त–म्लान ।

य

यक्ष्—१ प० (हिलाना, हिलना), लट्–यक्षति, लिट्–ययक्ष, लुट्–यक्षिता, लुङ्–अयक्षीत् ।

यक्ष्—१० आ०, पूजायाम् (आदर करना, पूजा करना) लिट्–यक्षयाञ्चक्रे, लुट्–यक्षयिता, लुङ्–अययक्षत, क्त–यक्षित ।

यज्—१ उ०, देवपूजासंगतिकरणयजनदानेषु (यज्ञ करना, आहुति डालना, देना, संगति करना), लट्–यजति-ते, लिट्–इयाज, ईजे, लुट्–यष्टा, लृट्–यक्ष्यति-ते, लङ्–अयक्ष्यत्–त, लुङ्–अयाक्षीत् (द्वि० अयाष्टाम्), अयष्ट, आ० लिङ्–इज्यात्–यक्षीष्ट । सन्–यियक्षति-ते, कर्म० लट्–इज्यते, लुङ्–अयाजि, णिच्–लट्–याजयति-ते, लुङ्–अयीयजत्–त, क्त–इष्ट, क्त्वा–इष्ट्वा, ल्यप्–समिज्य, तुम्–यष्टुम् ।

यत्—१ आ०, प्रयत्ने (यत्न करना, परिश्रम करना), लट्–यतते, लिट्–येते, लुट्–यतिता, लृट्–यतिष्यते, लुङ्–अयतिष्ट, आ० लिङ्–यतिषीष्ट । सन्–यियतिषते, कर्म० लट्–यत्यते, लुङ्–अयाति, णिच्–लट्–यातयति–ते, लुङ्–अयीयतन्–त, क्त–यत, क्त्वा–यतित्वा, ल्यप्–आयत्य ।

यत्—१० उ०, निकारोपस्कारयोः (चोट पहुँचाना, उत्साहित करना), लट्–यातयति-ते, लृट्–यातयिष्यति-ते, लुङ्–अयीयतत्–त । सन्–यियातयिषति-ते ।

यन्त्र्—१० उ०, सकोचे (रुकना आदि), लट्–यन्त्रयति-ते, लिट्–यन्त्रयाचकार-चक्रे, लुट्–यन्त्रयिता, लृट्–यन्त्रयिष्यति-ते, लुङ्–अययन्त्रत्–त । सन्–यियन्त्रयिषति-ते, कर्म०–लट्–यन्त्र्यते, क्त–यन्त्रित, क्त्वा–यन्त्रयित्वा ।

यभ्—१ प०, मैथुने (संभोग करना), लट्–यभति, लिट्–ययाभ, लुट्–यब्धा, लृट्–यप्स्यति, लङ्–अयप्स्यत्, लुङ्–अयाप्सीत् । णिच्–लट्–याभयति–ते, लुङ्–अयीयभत्–त, सन्–यियप्सते ।

